दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-9 ■ वर्ष-5 ■ अङ्क-300 | 1 | अगस्त 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लसप्तमी
भाद्रपद 03 प्रविष्टांशः मङ्गलमयः भवेत्

1 वाणिज्यमन्त्री पीयूषगोयलः जर्मनेः हेसेन-राज्यस्य मन्त्रिभ्यां बोरिस-राइन-मैनफ्रेड-पेन्ट्ज़-महाभागाभ्यां सह अमिलत्

3 आपदायां प्रलीनम् आसीत् दयोरी- विद्यालयभवनम्, अधुना नूतनभवने पठन- पाठनं प्रारब्धम्; सितम्बरमासे आगमिष्यति प्रियंका गान्धी

9 भागलपुरप्रमण्डलस्य अङ्गप्रदेशे बिहुलाविषहरीमहोत्सवस्य भव्यतया आयोजनम्

## अद्यतनीयं सुभाषितम्

**आत्मार्थं जीवलोकेऽस्मिन्,को न जीवति मानवः।**
**परं परोपकारार्थं, यो जीवति स जीवति।।**

भावार्थः- इस संसार में भला ऐसा कौन व्यक्ति है जो स्वयं के हित के लिए जीवनयापन नहीं करता है? परन्तु समाज में उसी व्यक्ति का जीवन सफल माना जाता है जो परोपकार के लिए जीता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र. पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैला, डॉ.अमित शर्मा, डॉ.नरेन्द्राणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराज:, डॉ.पद्मनाभ, डॉ.अभिषेकशर्मा

## नवदेहल्याः भारत-मण्डपे ब्रिक्स-राष्ट्राणाम् सम्मेलनस्य अध्यक्षता केन्द्रीय पर्यावरण-वन-जलवायु परिवर्तन-मन्त्री भूपेन्द्र यादवः अकरोत्



नवदेहल्याः भारत-मण्डपे ब्रिक्स-राष्ट्राणाम् द्वादशः पर्यावरण-मन्त्रिणां शिखर समवायः प्रावर्तत्। अस्य द्विदिवसीय सम्मेलनस्य अध्यक्षतां केन्द्रीय पर्यावरण-वन-जलवायु परिवर्तन-मन्त्री भूपेन्द्र यादवः अकरोत्। भारतस्य षड्विंशत्यधिकद्विसहस्रतमस्य वर्षस्य ब्रिक्स अध्यक्षतायाः मुख्य विषयः पर्यावरण-सहनशीलता तथा नवोन्मेषस्य संवर्धनम् अस्ति। सम्मेलनं सम्बोध्यन भूपेन्द्र यादवेन 'मानवता-प्रथम' दृष्टिकोणम् अनुसृत्य नीतीनाम्, दद्योगिक्याः, जन-सहभागितायाश्च एकीकृत प्रयासाः सुदृढाः कृताः। मन्त्रिणा ज्ञापितं यत् भारतेन पंचोत्तरद्विसहस्रतमवर्षतः द्वाविंशत्युत्तरद्विसहस्रतम वर्षावधौ मालिन्य-उत्सर्जिते सप्तत्रिंशतः अधिकः ह्रासः कृतः। तेन स्पष्टीकृतं यत् अध्यक्षत्वेन भारतं सर्वैः सदस्य राष्ट्रैः सह सहमति-आधारित-वार्तायै सदैव प्रतिबद्धं वर्तते।

## भारतीय-विशिष्ट-प्रत्यभिज्ञान-प्राधिकरणेन राष्ट्रव्यापि सङ्कल्पस्य अङ्गत्वेन छात्राणां द्विकोटिकोप्यधिकं अनिवार्य-आधार-बायोमेट्रिक कार्यं साफल्येन निर्व्यढम्



भारतीय-विशिष्ट-परिचय-प्राधिकरणेन अनिवार्य-बायोमेट्रिक-नवीकरणाय सञ्चालिते राष्ट्रव्यापि-अभियाने काचित् महती उपलब्धिः प्राप्ता। प्राधिकरणेन देशस्य विभिन्न विद्यालयेषु द्विवकोट्यधिकानां छात्राणां बायोमेट्रिक-नवीकरण-प्रक्रिया साफल्येन सम्पूरिता। विगतवर्षस्य सितम्बर-मासात् प्रारब्धे अस्मिन् विशेषाभियाने एतावता षड्पञ्चाशत्सहस्राधिकैकलक्ष-विद्यालयाः समाविष्टाः, येन कोटिशः छात्राः विद्यालयेष्वेव स्वकीयं बायोमेट्रिक-नवीकरणं कारयेयुः। इलैक्ट्रॉनिक्स सूचना प्रौद्योगिकी-मन्त्रालयेन स्पष्टीकृतं यत् अस्य अभियानस्य साहाय्येन अनिवार्य-बायोमेट्रिक सेवा साक्षात् विद्यालय-स्तरे प्रापिता, येन छात्रेभ्यः एषा प्रक्रिया अतीव सरला सौविध्ययुता च संवृत्ता। मन्त्रालयेन संसूचितं यत् पञ्च-वर्षेभ्यः अल्प-वयस्कानां शिशूनां कृते केवलं जनसांख्यिकीय-सूचनाः छायाचित्राणि च सङ्गृह्यन्ते, यतोहि तस्मिन् वयसि अङ्गुली-चिह्नानि नेत्र-तारक संरचना च अविकसिता भवति। अतः पञ्चमे वर्षे अथ च पुनश्च पञ्चदशे वर्षे बालकानां कृते अनिवार्य-बायोमेट्रिक-नवीकरणम् आवश्यकं भवति, येन तेषां बायोमेट्रिक-विवरणं सर्वथा अद्यतनं तिष्ठेत्।

## प्रशासनेन राष्ट्रिय-क्रीडा-पुरस्काराणां उद्घोषणा विहिता। बैडमिण्टन्-क्रीडायाः त्रीसा-जोली, पुल्लेला-गायत्री-गोपीचन्दः च अथ पञ्चदश-उत्कृष्टाः क्रीडकाः सम्माननीयाय 'अर्जुन पुरस्काराय' समभ्यर्थिताः





**पुलेला गोपीचन्दस्य पुत्री अस्ति गायत्री गोपीचन्दः**

प्रशासनेन पंचविंशत्युत्तरद्विसहस्रतमवर्षस्य 'राष्ट्रीय क्रीडा पुरस्काराः उद्घोषिताः। भारतस्य मुख्य-महिला-बैडमिण्टन्-युगलं तृषा-जॉली तथा पुल्लेला-गायत्री-गोपीचन्दः इत्येताभ्यां सह विविध-क्रीडा-शाखानाम् अन्येभ्यः पञ्चदश उत्कृष्ट-क्रीडकेभ्यः क्रीडा क्षेत्रे तेषां प्रशंसनीयकार्याय 'अर्जुन पुरस्कारः' प्रदास्यते। भारतस्य वरिष्ठ-फुटबॉल-क्रीडकः यशायाह-अरुमैनायगमः अर्जुन पुरस्कारेण विभूषितो भविष्यति। एतदतिरिच्य एथलेटिक्स् प्रशिक्षकः परवीर सिंहः, मुष्ट्दिन्द्व प्रशिक्षकः छोटे-लाल यादवः, नेहा-नन्दकुमार-चौहानः च 'द्रोणाचार्य पुरस्कारेण' सम्मानिताः भविष्यन्ति। तथैव 'आर्मी-पैरालिम्पिक्-नोड्, पुणे' संस्था 'राष्ट्रीय-क्रीडा-प्रोत्साहन पुरस्कारेण' अलङ्कृता भविष्यति।

## भारतीय-जनता-पार्टी इति दलेन राष्ट्रियगीतस्य वन्देमातरम् इत्यस्य कृताम् अवमाननामभिलक्ष्य काङ्ग्रेस-दलस्य तीव्रा आलोचना कृता

भारतीय-जनता-पार्टी इति दलेन नवदेहल्याम् अखिल भारतीय-काङ्ग्रेस-समित्याः मुख्य कार्यालये स्वतन्त्रता-दिवस-समारोहे राष्ट्रिय-गीतस्य वन्देमातरम् इत्यस्य कृताम् अवमाननामभिलक्ष्य काङ्ग्रेस-दलस्य तीव्रा आलोचना कृता। नवदिल्ल्याम् वार्ताहरान् सम्बोधयन् भाजपा-दलस्य प्रवक्ता रविशङ्कर-प्रसादः अवदत् यत् यदि काङ्ग्रेस-दलं राष्ट्रिय गीतस्यापि सम्मानं नैव कर्तुं शक्नोति, तर्हि तेन स्वातन्त्र्य-सङ्ग्रामस्य एकमात्र-संरक्षकः इति एकाधिकार प्रदर्शनं स्थगनीयम्। सः अग्रे आरोपितवान् यत् यदा काङ्ग्रेस अध्यक्षः मल्लिकार्जुन खड़गे गोवा-राज्यं गतवान्, तत्रापि दलस्य कार्यक्रमे वन्देमातरम् गीतस्य केवलं पद्य-द्वयमेव गीतम्।

## भारतीय-जनता-पार्टी इति दलेन उत्तरप्रदेश-पञ्जाब-गुजरात-राज्येषु नूतनाः राज्य-प्रभारिणः सह-प्रभारिणः च नियोजिताः



भारतीय-जनतादलस्य राष्ट्रियाध्यक्षेण नितिन-नबीनेन उत्तरप्रदेश-पञ्जाब-गुजरातप्रदेशेभ्यः नूतनप्रदेश-प्रभारिणः नियुक्ताः। विनोद तावडे उत्तर-प्रदेशस्य प्रभारीत्वेन अथ जगदीश ईश्वरभाई-पटेलः सह-प्रभारीत्वेन नियुक्तीकृतः। डा. सतीश-पूनिया पञ्जाब-राज्यस्य प्रभारी एवञ्च तरुण-चुघः गुजरात-राज्यस्य प्रभारी-पदे नियुक्तः।

# रामदेव-लोहरा त्रिभिः सहचरैः सह आरक्षी-बलेन निगृहीतः



झारखण्ड-राज्यस्य गुमला जनपदे डुमरी-आरक्षी-केन्द्र-सीमायां शासन-विद्रोहिणः जे.जे.एम्.पी. सङ्घस्य पञ्च-लक्ष-पारितोषिक-भूषितः उप-मण्डल-नेता रामदेव-लोहरा त्रिभिः सहचरैः सह आरक्षी-बलेन निगृहीतः । गुप्त-वार्ताम् आसाद्य कृतायाम् अस्यां निग्रह-क्रियायाम् अस्त्र-शस्त्राणि, गोलिकाः, सञ्चार-यन्त्राणि च गृहीतानि । अत्रावधेयं यत् आरक्षि-बलस्य उग्रवाद-विरोधि-अभियाने इयं महती सिद्धिः अस्ति।

# एन.सी.सी. कन्यानां 'अपराजिता पारंग ला 2026' इति सुदीर्घ-पर्वतारोहण-यात्रायाः ध्वजारोहणं विधाय यात्रा आरब्धा राजनाथ सिंहेन



नवदेहल्यां केन्द्रीय-रक्षामन्त्रिणा राजनाथ सिंहेन एन.सी.सी. कन्यानां 'अपराजिता पारंग ला 2026' इति सुदीर्घ-पर्वतारोहण-यात्रायाः ध्वजारोहणं विधाय यात्रा आरब्धा। त्रिंशत्-दिवसात्मिका एषा यात्रा हिमाचलस्य स्पीति-उपत्यकातः लद्दाखस्य चाङ्ङ्ग्याङ्ग-प्रदेशं यावत् सार्धद्विशत किलोमीटर्-विस्तीर्णं दुस्तरं पारङ्ङ्ग-ला-गिरिपथम् अतिक्रमिष्यति। त्रिसैना महिला नेतृणां सान्निध्ये अष्टाविंशति-कन्या-कैडेट्-सङ्घः अस्याः साहसिक यात्रायाः भागः अस्ति।

# उपराष्ट्रपतिना सी. पी. राधाकृष्णेन सह आईएसएस (ISS)-२०२६ वर्गस्य प्रशिक्षु-अधिकारिणः अमिलन्



भारतीय-साङ्ख्यिकी-सेवा (ISS)-२०२६ वर्गस्य प्रशिक्षु-अधिकारिणः उपराष्ट्रपतिना सी. पी. राधाकृष्णेन सह मेलनम् अकुर्वन्। अस्मिन् अवसरे उपराष्ट्रपतिः अवदत् यत् विश्वसनीयानि दत्तांश-तथ्यानि (आंकड़े) सुदृढ-नीतिनिर्माणस्य प्रभावशासनस्य च आधारशिला वर्तन्ते। श्रीराधाकृष्णः अकथयत् यत् आईएसएस-अधिकारिणाम् एषा महती दायित्वपूर्णा भूमिका अस्ति यत् ते दत्तांशाधारित-प्रणाल्याः निर्माणं कुर्युः, या जनसामान्येभ्यः अभीष्टं लाभं प्रापयेत्। सः प्रशिक्ष्वधिकारिणः न्यवेदयत् यत् ते स्वदायित्वं सूक्ष्मदृष्ट्या, सत्यनिष्ठया, धरातलीय-वास्तविकतायाः गभीर-अवबोधेन च निर्वहेयुः।

# वाणिज्यमन्त्री पीयूषगोयलः जर्मनेः हेस्सेन-राज्यस्य मन्त्रिभ्यां बोरिस-राइन-मैनफ्रेड-पेन्ट्ज़-महाभागाभ्यां सह अमिलत्



केन्द्रीय-वाणिज्य-उद्योगमन्त्री पीयूषगोयलः जर्मनीदेशस्य हेस्सेन-राज्यस्य मन्त्रिणा बोरिस-राइनेन तथा सङ्घीय-यूरोपीय-विषयाणां, सार्वाङ्गिक-प्रशासनिक-परिष्काराणां च मन्त्रिणा मैनफ्रेड-पेन्ट्जेन सह मेलनं कृतवान्। अस्मिन् उपवेशने जर्मनेः प्रमुखोद्योगानां प्रतिनिधिमण्डलमपि भागम् अगृह्णात्। श्रीगोयलः सामाजिक-माध्यम-सन्देशे प्रावोचत् यत् सम्भाषणकाले उभौ पक्षौ एआई (कृत्रिमबुद्धिः), स्वच्छोर्जा, अनुसन्धान-विकासौ, दत्तांश-केन्द्रम् (डेटा सेण्टर्), भेषजम् (फार्मा), रसायनम्, उत्पादनम्, फिनटेक्, दीप-टेक् तथा कौशलविकासस्य क्षेत्रेषु सहकारस्य नूतन-सम्भावनासु चर्चाम् अकुरुताम्। सः अकथयत् यत् भारत-हेस्सेनयोः मध्ये दृढं परस्पर-सहयोगं वर्धयन् भारतम् वाणिज्य-प्रौद्योगिकी-निवेश-नवीनोन्मेष-क्षेत्रेषु सहभागितां सुदृढां कर्तुं भारत-यूरोपीयसङ्घ-मुक्तव्यापार-अनुबन्धेन प्राप्तानां नूतनावसराणां लाभं स्वीकर्तुं सज्जम् अस्ति।

# कर्नूल-नगरे निर्मीयमाणं 'ड्रोन सिटी' देशस्य प्रथमा परियोजना भविष्यति: नागरविमाननमन्त्री के. राममोहननायडू



नागरविमाननमन्त्री के. राममोहननायडू अवदत् यत् आन्ध्रप्रदेशस्य कर्नूल-मण्डलस्य ओरवाकल-स्थाने विकस्यमानं 'ड्रोन सिटी' इति देशे स्वप्रकारस्य प्रथमा परियोजना भविष्यति। श्रीनायडू ड्रोन-नगरस्य भ्रमणम् अकरोत्। सः द्रोण-यन्त्राणां (ड्रोन्स्) प्रदर्शनीम् अपश्यत् तथा प्रायशः ७० ड्रोन-कम्पनीनां मुख्यकार्यकारि-अधिकारिभिः (सीईओ) सह मेलनम् अकरोत्। श्रीनायडू अकथयत् यत् वर्षद्वयात् पूर्वम् अमरावती-नगरे राज्यसर्वकारस्य सहयोगेन ड्रोन-सम्मेलनम् आयोजितम् आसीत्। तस्मिन् एव समये एतादृशस्य ड्रोन-नगरस्य निर्माणस्य सङ्कल्पः कृतः, यत्र ड्रोन-प्रौद्योगिक्या सम्बद्धानि सर्वाणि क्षेत्राणि एकत्र आनेतुं शक्येरन्। सः असूचयत् यत् सुदृढ-ड्रोन-व्यवस्थायाः विकासाय प्रायः १५० कम्पनीनां मुख्यकार्यकारिभिः सह विचारविमर्शः कृतः। ड्रोन-नगरे अधुना यावत् प्रायशः पञ्चसहस्रकोटि-रूप्यकाणां (₹5000 कोटि) निवेशाय अनुमतिः दत्ता। श्रीनायडू अवदत् यत् सर्वकारस्य लक्ष्यं भारतं ड्रोन-निर्माणस्य प्रौद्योगिक्याश्च क्षेत्रे विश्वस्य अग्रगण्यं देशं विधातुम् अस्ति।

# एनटीए (NTA) इत्यनया परीक्षा-व्यवस्थायां बृहत् परिवर्तनं कृतम्

राष्ट्रीय-परीक्षा-अभिकरणेन (NTA) परीक्षाव्यवस्थायां महत् परिवर्तनं कृतम्। अभिकरणेन प्रायः ६०० तज्ज्ञान् निष्कास्य नूतन-विशेषज्ञानां समावेशस्य निर्णयः गृहीतः। शिक्षामन्त्रालयस्य अनुसारं प्रश्नपत्राणां परीक्षार्थं चतुःस्तरीयव्यवस्था प्रवर्तिष्यते। आगामिषु द्वि-त्रि-सप्ताहेषु २० तः २५ नूतनाधिकारिणः अपि अभिकरणे सम्मिलिताः भविष्यन्ति। अपि च, अभिकरणस्य नूतनकार्यालये सीआईएसएफ (CISF) सुरक्षाबलस्य नियोजनेन सह सुरक्षाव्यवस्था सुदृढा विधास्यते। एषः निर्णयः केन्द्रीयशिक्षामन्त्रिणः प्रह्लादजोशी-महोदयस्य निर्देशेन गृहीतः।

# स्थलसेनाध्यक्षः जनरल धीरजसेठः नेपालस्य प्रधानमन्त्रिणा बालेन्द्रशाहेन सह अमिलत्

भारतीयस्थलसेनाध्यक्षः जनरल धीरजसेठः अद्य काष्ठमण्डपे (काठमाण्डू) नेपालस्य प्रधानमन्त्रिणा बालेन्द्रशाहेन सह मेलनम् अकरोत्। एतत् मेलनं तस्य चतुर्दिवसीय-नेपाल-यात्रायाः अवसरे अभवत्। नेपालस्य प्रधानमन्त्रिकार्यालयस्य अनुसारं, सा एका शिष्टाचार-भेटः आसीत्। अस्मिन् अवसरे नेपाले भारतस्य राजदूतः नवीनश्रीवास्तवः अपि उपस्थितः आसीत्। नेपालस्य राष्ट्रपतिः रामचन्द्रपौडेलः ह्यः जनरल धीरजसेठाय नेपालीसेनायाः 'मानद-जनरल' इत्युपाधिं समर्पितवान्। जनरल सेठः नेपालसेनाध्यक्षस्य जनरल अशोकराजसिग्देलस्य औपचारिक-निमन्त्रणेन रविवासरे काष्ठमण्डपं प्राप्तवान् आसीत्। नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः नेपालस्य रक्षामन्त्रालयस्य कार्यभारमपि वहति।

# कृषिमन्त्री शिवराजसिंहचौहानः उभयोः मन्त्रालययोः अधिकारिभ्यः कर्मचारिभ्यश्च 'शक्तेः सप्तधारा'-शपथम् अकारयत्

कृषि-तथा-कृषककल्याण-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः नवदेहल्याम् उभयोः मन्त्रालययोः अधिकारिभ्यः कर्मचारिभ्यश्च 'शक्तेः सप्तधारा'-शपथम् अकारयत्। अस्मिन् अवसरे कृषि-कृषककल्याण-राज्यमन्त्री भागीरथचौधरी तथा ग्रामीणविकास-राज्यमन्त्री डॉ. चन्द्रशेखरपेम्मासानी अपि उपस्थितौ आस्ताम्। श्रीचौहानः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी शक्तेः सप्तधारा-माध्यमेन विकसितभारतस्य निर्माणाय स्पष्टं मार्गचित्रं (रोडमैप) दत्तवान्। सः अधिकारिणः कर्मचारिणश्च स्वविभागानां कृते स्पष्टलक्ष्यं निर्धारयितुं तत् प्राप्तुं च दृढां कार्ययोजनां निर्मातुम् आहूतवान्। सः अकथयत् यत् देशेन कृषि-उत्पादनवर्धनस्य सममेव तस्य गुणवत्तायामपि ध्यानं दातव्यम्, येन भारतीयकृषकाणाम् उत्पादाः अन्ताराष्ट्रियविपण्यां दृढां प्रतिष्ठां लभेरन्। सः प्रावोचत् यत् भारतीयकृषेः वैश्विकविपण्या सह संयोजनं समयस्य आवश्यकता अस्ति। श्रीचौहानः अवदत् यत् ग्रामीणविकासाय तिस्रः कोटिः ग्रामीणमहिलाः 'लखपति दीदी' विधातुं लक्ष्यं सम्प्राप्तम्। अधुना षट्कोटि (६ कोटि) 'लखपति दीदी' निर्माणस्य लक्ष्यं वर्तते। सः अकथयत् यत् विकसितानां ग्रामाणां विना विकसितभारतस्य स्वप्नः पूर्णः भवितुं नार्हति। श्रीचौहानः जलसुरक्षायाः, नदीनां पुनरुज्जीवनस्य, भूमिसम्पदां संरक्षणस्य ग्रामीणोपजीविका-सम्बद्धानां कार्यक्रमानां च त्वरितगत्या सञ्चालने बलं दत्तवान्।

# भ्रष्टाधिकारिभ्यः सेवाविस्तारः, नूतनाधिकारिभ्यः सर्वकारेण अस्वीकारः-जयरामठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।**
पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः राज्ये भा.प्र.से. (IAS), भा.पु.से. (IPS), भा.व.से. (IFS) अधिकारिणां संख्यायाः न्यूनीकरणसम्बन्धे मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः वक्तव्ये प्रहारम् अकरोत्। सः अवदत् यत् एषः कश्चन विचित्रः सर्वकारः अस्ति, यः सङ्घलोकसेवायोगेन (UPSC) चयनितानां नूतनाधिकारिणां स्वीकरणे अस्वीकारं कुर्वन् अस्ति, किन्तु भ्रष्टाचारारोपग्रस्तेभ्यः अधिकारिभ्यः पुनः पुनः सेवाविस्तारं प्रयच्छति। जयरामठाकुरः कस्यचित् पूर्व-भा.प्र.से. अधिकारिणः नामोल्लेखं विना अवदत् यत् यदा काङ्ग्रेसपक्षः प्रतिपक्षे आसीत्, तदा अस्मिन्नेव अधिकारिणि भ्रष्टाचारस्य आरोपाः क्रियन्ते स्म। अधुना स एव अधिकारी सर्वकारस्य एतावान् प्रियः जातः यत् तस्मै निरन्तरं सेवाविस्तारः दीयते। सः अकथयत् यत् सर्वकारस्य कार्यकालः प्रायः एकवर्षमेव अवशिष्टः अस्ति, तथापि सम्बद्धाय अधिकारिणे वर्षद्वयस्य सेवाविस्तारः प्रदत्तः। सः अवदत् यत् मुख्यमन्त्री अधिकारिणां व्ययन्यूनतायाः चर्चां करोति, किन्तु सः स्वपरितः स्थितां व्ययसेनां द्रष्टुं न शक्नोति। अध्यक्षेभ्यः उपाध्यक्षेभ्यः च मन्त्रिमण्डलपदवीं प्रदाय राजकीयव्ययः वर्धितः। एतदतिरिक्तं मित्रेभ्यः सर्वकारीयपदेषु नियुक्तयः दीयन्ते। जयरामः अवदत् यत् यदि व्ययः न्यूनीकरणीयः अस्ति, तर्हि अस्य आरम्भः मुख्यमन्त्रिणा स्वयमेव करणीयः। जयरामठाकुरः आरोपम् अकरोत् यत् सर्वकारेण मित्राणां नियुक्तीनां क्रमः अद्यापि निरन्तरं रक्षितः। मुख्यसंसदीयसचिवानां नियुक्तयः अपि अवैधानिकरीत्या विधाय राज्यस्य धनस्य दुरुपयोगः कृतः। सः अवदत् यत् निरन्तरं मन्त्रिमण्डलविस्तारस्य वार्ताः क्रियन्ते, किन्तु मन्त्रिणः न रच्यन्ते। मुख्यमन्त्री स्वयमेव स्वोपहासं कुर्वन् अस्ति, तस्य नीतिभिः च राज्यस्य महती हानिः जायमाना वर्तते।

# कर्तन्या कारयानं कर्तयित्वा निष्कासितः जनः, अम्बे भीषणः मार्गदुर्घटना, ५ युवानः क्षतविक्षताः

हिमसंस्कृतवार्ताः- बड्हूही।ऊना-अम्ब-राष्ट्रीयराजमार्गे एका भीषणा दुर्घटना संजाता। अत्र एकस्य कारयानस्य महाभारवाहिन्या (ट्राला-वाहनेन) सह तीव्रः संघातः जातः, येन कारयानस्य चक्रस्य वाताशयः स्फोटितः। अस्यां दुर्घटनायां पञ्च युवानः क्षतविक्षताः अभवन्, येषां स्थितिः चिन्ताजनका वर्तते। संघातः एतावान् तीव्रः आसीत् यत् कारयानस्य खण्डशः भागाः विकीर्णाः अभवन्। संघातस्य तीव्रतया कारयाने उपविष्टः एकः जनः अन्तः दृढं निबद्धः, यः कर्तन्या (कटर-उपकरणेन) कारयानं कर्तयित्वा बहिः निष्कासितः। कारयाने उपविष्टाः जनाः अम्ब- रेलयानागारस्य समीपस्थाः कथ्यन्ते, ते च अम्ब- दिशं प्रति गच्छन्ति स्म।

# आपदायां प्रलीनम् आसीत् दयोरी- विद्यालयभवनम्, अधुना नूतनभवने पठन- पाठनं प्रारब्धम्; सितम्बरमासे आगमिष्यति प्रियंका गान्धी

**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अद्य मण्डीमण्डलस्य राजकीय- वरिष्ठ- माध्यमिक- विद्यालय- दयोरी इत्यस्य नवनिर्मितभवने कक्षासञ्चालनावसरे आयोजिते समारोहे शिमलानगरात् आभासीयमाध्यमेन (वर्चुअल-माध्यमेन) सम्मिलितः अभवत्। राजकीय- प्राथमिक-विद्यालय-दयोरी इत्यस्य निर्माणं प्रायः ७० लक्षरूप्यकाणां व्ययेन, राजकीय- वरिष्ठ- माध्यमिक-विद्यालय-दयोरी इत्यस्य निर्माणं ३ कोटिः ६२ लक्षरूप्यकाणां व्ययेन कृतम् अस्ति। दयोरी-विद्यालयभवनम् अतिवृष्टिकारणात् १४ अगस्त २०२३ दिनाङ्के पूर्णतया प्रलीनम् (प्रवाहितम्) अभवत्।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः स्वसम्बोधने अवदत् यत् काङ्ग्रेसदलस्य महासचिवः सांसदसदस्या च प्रियंकागान्धी दयोरी-ग्रामे नूतनविद्यालयभवनस्य लोकार्पणोत्सवे स्वयम् उपस्थातुम् ऐच्छत्, किन्तु प्रतिकूलऋतोः कारणात् आगन्तुं नाशक्नोत्। सः अकथयत् यत् प्रियंका गान्धी दयोरी-विद्यालयस्य छात्रैः सह मेलितुं तैः सह सम्भाषितुं च इच्छति, अतः सा आगामिनि सितम्बरमासे अत्र आगमिष्यति। मुख्यमन्त्री सुक्खुः अभिनन्दनं कुर्वन् अवदत् यत् अस्य विद्यालयभवनस्य पुनर्निर्माणे स्थानीयसमुदायस्य प्रशंसनीयं योगदानं वर्तते। सः दयोरी-विद्यालयस्य निर्माणार्थं शिक्षाविभागाय एकबीघापरिमितं भूमिदानं कृतवतीभ्यः स्थानीयनिवासिनीभ्यः चिन्तादेव्यै, दासीदेव्यै, पुन्नीदेव्यै च कृतज्ञतां प्रकटितवान्।
मुख्यमन्त्री न्यवेदयत् यत् राज्यसर्वकारः क्षतिग्रस्तानां विद्यालयभवनानां पुनर्निर्माणम् आधुनिकरीत्या कुर्वन् अस्ति। व्यवस्थापरिवर्तनस्य उद्देश्येन शिक्षानीतौ महत्त्वपूर्णाः परिहाराः क्रियन्ते। छात्रेभ्यः गुणात्मिकां शिक्षां प्रदातुं दिशायां महत्त्वपूर्णाः परिवर्तनाः कृताः सन्ति।



परिणामतः शिक्षाक्षेत्रे यत् हिमाचलप्रदेशराज्यं २०२१ वर्षे एकविंशतितमे (२१) स्थाने आसीत्, तत् अधुना राज्यसर्वकारस्य प्रयासैः पञ्चमे (५) स्थाने प्राप्तम् अस्ति। मुख्यमन्त्री सांस्कृतिक- कार्यक्रम-प्रस्तुतिकरणाय विद्यालयाय एकलक्ष रूप्यकाणि दातुं घोषणां कृतवान्। अस्मिन् अवसरे दयोरी- ग्रामे आयोजिते समारोहे मुख्यमन्त्रिणः राजनीतिक-परामर्शकः सुनीलशर्मा बिट्टू काङ्ग्रेस- महासचिव-सांसद- प्रियंकागान्धी-महोदयायाः छात्रेभ्यः प्रेषितं सन्देशं पठितवान्।
सांसदसदस्या प्रियंका गान्धी मण्डीमण्डलस्य दयोरी-ग्रामे आपदायाः दृश्यं स्मरन्ती अवदत् यत् सर्वैः धैर्येण अस्याः विपदः सामना कृता। मया १२ सितम्बर २०२३ दिनाङ्के इयं त्रासदी स्वनेत्राभ्यां दृष्टा आसीत्। एतेषु त्रिषु वर्षेषु सर्वैः क्षतिग्रस्त- विद्यालयभवनस्य निर्माणार्थं कठोरः परिश्रमः कृतः। अधुना नूतनविद्यालयभवने कक्षाणां सञ्चालनं प्रारब्धम् अस्ति। प्रियंका गान्धी छात्राणाम् उज्ज्वलभवितव्यस्य कामनां कुर्वती विद्यालये आगत्य तैः सह मेलनस्य वचनं दत्तवती।

# हिमाचले मादकद्रव्येषु सर्वकारस्य महदाक्रमणम्; ५,६४२ प्रकरणानां पञ्जीकरणम्, ८,२५० अपराधिनां च निग्रहः

**हिमसंस्कृतवार्ताः- शिमला।**
स्वास्थ्य- सामाजिकन्याय- अधिकारितामन्त्री डॉ. (कर्नल) धनीरामशाण्डिलस्य अध्यक्षतया अद्य अत्र मादकद्रव्याणां सेवनस्य तस्करतायाश्च विरुद्धं हितधारकाणां कृते एकदिवसीयायाः कार्यशालायाः आयोजनं कृतं, यस्यां हिमाचलप्रदेशं व्यसनमुक्तं (नशामुक्तं) विधातुं विस्तरेण विचारविमर्शः अभवत्। अस्मिन् अवसरे डॉ. शाण्डिलः अवदत् यत् मादकद्रव्याणि शारीरिक-मानसिकदृष्ट्या अतीव हानिकराणि सन्ति। सः न्यवेदयत् यत् राज्यसर्वकारः मादकद्रव्यसेवनस्य तस्करतायाश्च विरुद्धं प्रभावशालिनि पदानि गृह्णाति। प्रदेशसर्वकारेण व्यसनस्य विरुद्धं 'शून्यसहनशीलता' नीतिः अङ्गीकृता, व्यसननिवारणाय विधानसभायां कठोराः नियमाः च पारिताः सन्ति। नियमे मृत्युदण्डः, आजन्मकारावासः, गुरुलक्षणः दण्डः, सम्पत्तिहरणम् इत्यादयः कठोराः प्रावधानाः कृताः।
सः अकथयत् यत् प्रदेशसर्वकारेण व्यसनस्य विरुद्धं १५ नवम्बर २०२५ दिनाङ्के शिमलायाः ऐतिहासिकात् 'रिज' स्थानात् 'चिट्टा- विरोधि- पदयात्रायाः' शुभारम्भः कृतः आसीत्। इदम् आयोजनं 'चिट्टा' इति मादकद्रव्यस्य विरुद्धं जनस्वरम् एकत्रीकृत्य जनान्दोलनरूपेण परिवर्तयितुम् आरब्धम्। धर्मशालायाम्, हमीरपुरे, बिलासपुरे च अपि विशालाः पदयात्राः आयोजिताः। एतासु युवाभिः, महिलाभिः, सामाजिकसंस्थाभिः, सामान्यजनैश्च सहस्रशः सङ्ख्यासु सहभागः कृतः। सः अवदत् यत् प्रदेशे राष्ट्रिय- नशानिवारण- अभियानस्य अन्तर्गतं प्रशंसनीयं कार्यं क्रियते। अस्य अभियानस्य अन्तर्गतं गते वर्षे सर्वेषु मण्डलेषु प्रायः १८.५० लक्षं जनाः व्यसनस्य दुष्परिणामानां विषये सचेतनाः कृताः। एतेषु १७,३०४ शैक्षणिकसंस्थासु अध्ययनरताः बालकाः अपि सम्मिलिताः सन्ति। सः अकथयत् यत् हिमाचलप्रदेशः देशे प्रथमो राज्यः जातः, यत्र ग्रामपञ्चायतस्तरे चिट्टा-तस्कराणां तस्य सेवनकर्तॄणां च अभिज्ञानं कृत्वा पञ्चायताः विभिन्नेषु वर्गेषु वर्गीकृताः सन्ति। प्रदेशे 'पी.आई.टी. एन.डी.पी.एस.' अधिनियमस्य कठोरतया पालनेन अधुना यावत् ६३ कोटिरूप्यकेभ्यः अधिका सम्पत्तिः समपहृता वर्तते।
प्रदेशसर्वकारस्य कार्यकाले ५,६४२ प्रकरणानां पञ्जीकरणं कृतं, ८,२५० अपराधिनां च निग्रहणम् अभवत्। सः उक्तवान् यत् हिमाचलप्रदेशस्य कुल्लू, ऊना, हमीरपुर, कांगड़ा-मण्डलेषु पुरुषाणां कृते चत्वारि, रेडक्रॉस-संस्थया कुल्लूमण्डले महिलानां कृते च एकं व्यसनमुक्ति-पुनर्वासकेन्द्रं सञ्चाल्यते।

## हिमाचलम् भूतपूर्वसैनिक-आरक्षणवर्गे चित्रकला-शिक्षकेभ्यः (ड्राइंग-मास्टरेभ्यः) महती समाश्वासना, प्रारम्भावस्थायाः नियुक्तेः एव प्राप्स्यन्ते सर्वे लाभाः

हिमाचलप्रदेश-उच्चन्यायालयेन भूतपूर्वसैनिक-आरक्षणवर्गे संविदा-आधारेण (अनुबन्ध-आधारेण) नियुक्तानां चित्रकला-शिक्षकाणां पक्षे महत्त्वपूर्णः निर्णयः श्रावितः। न्यायालयेन राज्यसर्वकारः आदिष्टः यत् याचिकाकर्तॄणां प्रारम्भावस्थायाः नियुक्तितिथेः आरभ्य समग्रा संविदा-सेवा ज्येष्ठतायै (वरिष्ठतायै), वेतनावृद्धये (इन्क्रीमेण्ट्), निवृत्तिवेतनाय (पेन्शन) अन्येभ्यश्च वित्तीयलाभार्थं परिगणनीया। न्यायमूर्ति-जियालालभारद्वाजस्य एकलपीठेन ईश्वरदत्तशर्मणः अन्येषां च पक्षतः प्रविष्टायाः याचिकायाः समाधानं कुर्वता अयम् आदेशः प्रदत्तः। इदं प्रकरणं २००८-०९ वर्षे चित्रकला-शिक्षकाणां पदानां नियोजनप्रक्रियया सह सम्बद्धम् अस्ति।

प्रतिवादिना शिक्षाविभागेन सिरमौरमण्डले भूतपूर्वसैनिक-आरक्षणवर्गस्य अन्तर्गतं चित्रकला-शिक्षकाणां पदानां पूरणार्थं प्रक्रिया आरब्धा आसीत्। सैनिककल्याणमण्डलेन नाम्नां संस्तुतौ कृतायां सत्यां ३० अगस्त २०११ दिनाङ्के याचिकाकर्तृभ्यः नियमितपदानां स्थाने केवलं संविदा-आधारेण नियुक्तिपत्राणि प्रदत्तानि। याचिकाकर्तॄणां तर्कः आसीत् यत् भूतपूर्वसैनिक-आरक्षणवर्गस्य अवशिष्टानि (बैकलॉग्) पदानि नियमितरूपेण एव पूरणीयानि आसन्। संविदा-आधारेण नियुक्तिप्रदानम् अनुचितम्, अवैधं तथा च संविधानस्य अनुच्छेद-१४, १६, २१ इत्येतेषाम् उल्लङ्घनं वर्तते।

## HPRCA: वाणिज्य-भूगोलशिक्षकनियोजनस्य परिणामः घोषितः, २५३ पदानां कृते अभवत् सङ्गणकाधारिता परीक्षा

हिमाचलराज्यचयन-आयोगेन (HPRCA) विद्यालयशिक्षाविभागे भूगोलशिक्षकनियोजनस्य अन्तिमः परिणामः उद्घोषितः। शिक्षकाणां ९९ पदानि निश्चितमानदेयाधारेण पूरयितुं पदसङ्केत-२६०२७ (Post Code-26027) इत्यस्य अन्तर्गतम् आयोजितायाम् सङ्गणकाधारितपरीक्षायां (CBT) सफलीभूतानाम् अभ्यर्थिनां प्रमाणपत्राणां सत्यापनानन्तरम् अयम् परिणामः प्रकाशितः। अस्मिन् ९७ अभ्यर्थिनः चयनिताः सन्ति। आयोगस्य सचिवेन डॉ. विक्रममहाजनेन उक्तं यत् एतेषां पदानां कृते आहत्य ३३२ अभ्यर्थिभिः आवेदनं कृतम् आसीत्, येषु २६८ जनाः सङ्गणकाधारितपरीक्षायाम् उपस्थिताः अभवन्। अस्यां परीक्षायां २०२ अभ्यर्थिनः प्रमाणपत्राणां परीक्षार्थं चयनिताः आसन्। ११ तथा १२ अगस्त दिनाङ्कयोः प्रमाणपत्राणां सत्यापनानन्तरं ९७ अभ्यर्थिनः चयनिताः। योग्यप्रत्याशिनाम् अप्राप्तिकारणात् सामान्य (स्वातन्त्र्यसेनानी-आश्रित) तथा अनुसूचितजाति (स्वातन्त्र्यसेनानी-आश्रित) वर्गयोः एकम्-एकं पदं रिक्तम् एव अवशिष्टम्। सचिवः अकथयत् यत् अयम् अन्तिमपरिणामः सर्वेषाम् अभ्यर्थिनां नामभिः, अनुक्रमाङ्कैः (Roll Numbers), अङ्कैश्च सह आयोगस्य अन्तर्जालपुटे (Website) उपलब्धः कृतः अस्ति।

### वाणिज्यशिक्षकनियोजनपरीक्षायाः परिणामः घोषितः

राज्यचयन-आयोगेन विद्यालयशिक्षाविभागे वाणिज्यशिक्षकाणां १५६ पदानि पदसङ्केत-२६०२० इत्यस्य अन्तर्गतं निश्चितमानदेयाधारेण पूरयितुम् आयोजितायाः सङ्गणकाधारितपरीक्षायाः (CBT) परिणामः उद्घोषितः। अयम् परीक्षापरिणामः आयोगस्य अन्तर्जालपुटे उपलब्धः अस्ति।

# न गोपिता सम्पत्तिः, न च कोऽपि व्यवहारः, प्रमाणैः सह समर्पयामि सर्वं वित्तीयवृत्तम्- सुधीरशर्मा

**हिमसंस्कृतवार्ताः- धर्मशाला।**
भूतपूर्वमन्त्री धर्मशालायाः भाजपा-विधायकः सुधीरशर्मा राज्यसतर्कता- भ्रष्टाचारनिरोधकब्यूरो-संस्थया धर्मशालायां पञ्जीकृतायाः प्राथमिकी-सङ्ख्यायाः ०००६/२०२६ (FIR No. 0006/2026) विषये अवदत् यत् भारतीय-नागरिक- सुरक्षासंहिता-२०२३ इत्यस्य ३५- तमायां धारायाम् प्रदत्तस्य सूचनापत्रस्य विस्तरेण उत्तरं दीयते, अन्वेषणे पूर्णः सहयोगः विधीयते। सतर्कताविभागेन पृष्टानां सर्वेषां वित्तीयव्यवहाराणां, बैंक-लेखानां, निवेशानां, सम्पत्तीनाम् अन्येषां च अभिलेखानाम् उपलब्धप्रमाणैः सह पूर्णं विवरणं प्रदीयते।

सुधीरशर्मा न्यवेदयत् यत् अस्मिन् विषये तस्य स्थितिः सर्वथा स्पष्टा अस्ति न काऽपि सम्पत्तिः गोपिता, न च कोऽपि वित्तीयव्यवहारः निगूहितः। यदि अन्वेषणसंस्था कस्याश्चित् विशिष्टसम्पत्तेः गोपनस्य आरोपं करोति, तर्हि तस्याः सम्पत्तेः स्पष्टम् अभिज्ञानं कृत्वा तत्सम्बद्धाः अभिलेखाः पुरतः उपस्थापनीयाः। वास्तविकं गोपनं प्रमाणीकृत्य विना आरोपप्रक्षेपणं भ्रान्तिजननाय, तस्य सार्वजनिकप्रतिष्ठां हन्तुं प्रयासः प्रतीयते। सः प्रश्नम् अकरोत् यत् यदा एकः सामान्यनागरिकः कस्यचित् राजनेतुः निर्वाचनाभिपत्रे तस्मिन् घोषितां च स्थावर- जङ्गम- सम्पत्तिं द्रष्टुं शक्नोति, तर्हि सैव सूचना शासनात् अन्वेषणसंस्थाभ्यश्च कथं गोपयितुं शक्यते?

सः प्रत्यपादयत् यत् सम्पत्तीनां पञ्जीकरणम्, विक्रयपत्राणि, राजस्वलेखाश्च शासकीयविभागेषु प्राप्यन्ते। तथैव बैंकलेखाः, डीमैटलेखाः, निवेशसम्बद्धाः अभिलेखाश्च सम्बद्ध-वित्तीयसंस्थासु अङ्किताः वर्तन्ते। निर्वाचनप्रत्याशी अपि नियमानुसारेण स्वसम्पत्तेः देयतानां च विवरणं निर्वाचनाभिपत्रे ददाति, एषा च सूचना सार्वजनिकी भवति। "यदा शासकीय-अभिलेखात् सार्वजनिकप्रमाणैश्च सर्वं तथ्यं प्रमाणीकर्तुं शक्यते, तदा सम्पत्तिगोपनस्य वार्ता कस्मिन् आधारे क्रियते? यदि मया काऽपि सम्पत्तिः गोपिता, तर्हि शासनम् अन्वेषणसंस्था च तस्याः विशिष्टसम्पत्तेः नाम अभिलेखं च सार्वजनिकं कुर्याताम्।"

## डीमैट-अभिलेखः अपि प्रमाणीकरणाय उपलब्धः कृतः

सुधीरशर्मा अकथयत् यत् सतर्कताविभागेन भागांशानां निवेशस्य च विषये अपि सूचना याचिता। भागानां पूर्णं विवरणं डीमैट-अभिलेखश्च प्रमाणीकरणार्थं सतर्कताविभागाय समर्पितः। सः अवदत् यत् अन्वेषणसंस्थया बैंकलेखाः, डीमैट-लेखाः, सम्पत्तयः, वाहनानि, निवेशाः, ऋणानि तथा च अन्याः स्थावर-जङ्गमाः सम्पत्तयः इति सम्बद्धाः विपुलाः अभिलेखाः याचिताः, सा याचिता सूचना प्रमाणैः सह प्रदीयते।



## ₹७४.०७ लक्षमूल्यकस्य पैतृकभूमेः विक्रयस्य पूर्णः अभिलेखः विद्यमानः

सुधीरशर्मा अवदत् यत् तस्मिन् काले बैजनाथस्थितायाः पैतृकभूमेः द्वौ भागौ विक्रीतौ आस्ताम्। उभयोः व्यवहारयोः आहत्य राशिः ₹ ७४,०७,००० (चतुःसप्ततिलक्षाणि सप्तसहस्रं रूप्यकाणि) आसीत्। सः स्पष्टीकृतवान् यत् उभौ अपि व्यवहारौ विधिवत् पञ्जीकृतौ स्तः, शासकीय-अभिलेखात् तयोः प्रमाणीकरणं भवितुं शक्यते। अतः एतौ व्यवहारौ गोपयितुं प्रश्नः एव न उद्भवति।

## ₹१४.५० लक्षमूल्यकस्य व्यवहारस्य अपृष्टेऽपि स्वयमेव विवरणं दत्तम्

सुधीरशर्मा अवदत् यत् तस्मिन्नेव समये बीड़-निवासिने अनुरागशर्मणे अन्या एका सम्पत्तिः ₹ १४,५०,००० (चतुर्दशलक्षाणि पञ्चाशत्सहस्रं रूप्यकाणि) मूल्ये विक्रीता आसीत्। सतर्कताविभागस्य सूचनापत्रे अस्य विशिष्टव्यवहारस्य विवरणं पृथक्त्वेन न याचितम् आसीत्, तथापि पारदर्शकतां संरक्ष्य स्वयमेव सतर्कताविभागाय दीयमाने उत्तरे एतत् सम्मिलितं कृतम्। सः अवदत्-> "यस्य व्यवहारस्य विषये विशेषरूपेण न पृष्टम्, तस्यापि सूचनाम् अहं स्वयम् अन्वेषणसंस्थायै ददामि। एतस्मात् अधिका पारदर्शकता का भवितुम् अर्हति?"

सः उक्तवान् यत् अस्य व्यवहारस्य अन्वेषणे कृतेऽपि तस्य काऽपि आपत्तिः नास्ति। अपि तु तस्य याचना अस्ति यत् प्रत्येकस्य प्रासङ्गिकस्य वित्तीयव्यवहारस्य अन्वेषणं भवेत्, किन्तु अन्वेषणस्य मापदण्डः सर्वेषां कृते समानः स्यात्। सः प्रश्नम् उत्थापयत् यत् यदा तत्कालीनानां सम्पत्तीनां वित्तीयव्यवहाराणां च एतावत् विस्तृतम् अन्वेषणं क्रियते, तदा अस्य पञ्जीकृतस्य ₹१४.५० लक्षव्यवहारस्य सूचना विशेषरूपेण किमर्थं न याचिता? अन्वेषणं चयनात्मकं न, अपि तु सम्पूर्णं स्यात्।

आयोगस्य सचिवः डॉ. विक्रममहाजनः अवदत् यत् वाणिज्यशिक्षकाणां १५६ पदानां कृते १,७३४ अभ्यर्थिभिः आवेदनं कृतम् आसीत्, येषु १,४५१ अभ्यर्थिनः परीक्षायाम् उपस्थिताः आसन्। अस्यां परीक्षायाम् उत्तीर्णाः ३५९ अभ्यर्थिनः प्रमाणपत्राणां सत्यापनाय ७ सितम्बर दिनाङ्के प्रातः १० वादने आयोगस्य प्राङ्गणे आहूताः भविष्यन्ति। अस्याः सूचनायाः सम्प्रेषणम् अभ्यर्थिनां वि-पत्रे (Email ID) करिष्यते। एतैः सर्वैः अभ्यर्थिभिः स्वैः सह सर्वेषां मुख्याभिलेखानां मूलप्रतिरूपाणि, तेषां स्वयं प्रमाणीकृतानां छायाचित्राणां (Photocopy) द्वौ-द्वौ समूहौ (Sets), आवेदनपत्रस्य मुद्रिता प्रतिः (Download Copy), परिचयपत्रं (ID Proof) च अवश्यम् आनेतव्यानि। सचिवः स्पष्टीकृतवान् यत् यदि कश्चित् अभ्यर्थी निर्धारितायां तिथौ अनुपस्थितः भविष्यति, तर्हि तस्मै अपरः कश्चिदपि अवसरः न प्रदास्यते।

# बोकारो प्रसिद्धस्य साहित्यलोक नामकस्य साहित्यिक-संस्थायाः मासिक-रचनागोष्ठी सम्पन्ना




हिमसंस्कृतवार्ता। साहित्यलोके मासिक-रचनागोष्ठ्यां देशभक्तेः सावनमासस्य च विषयाधारितानां रचनानां समृद्धिः "सावनः मिथिलायाः मधुमासः..."
"राजनीतेः गौरवम् आसन् अटलः, संसदः परिचयः आसन् अटलः।"
बोकारो प्रसिद्धस्य साहित्यलोक नामकस्य साहित्यिक-संस्थायाः मासिक-रचनागोष्ठी रविवासरे सायंकाले सेक्टर-८ क्षेत्रे वरिष्ठसाहित्यकारस्य विजयशंकरमल्लिकस्य 'सुधापति' इत्यस्य निवासस्थाने आयोजिता। हिन्दी- संस्कृत- मैथिलीभाषाणां साहित्यकारेण डॉ. रामनारायणसिंहेन अध्यक्षतायां, साहित्यलोकस्य संयोजकेन अमनकुमारझा-महोदयेन सञ्चालनायां सम्पन्नायां अस्यां रचनागोष्ठ्यां वरिष्ठसाहित्यकारः बुद्धिनाथझा, मिथिला-एकेडमी-पब्लिक-स्कूलस्य अध्यक्षः राजेन्द्रकुमारः, कविः अरुणपाठकः, धनञ्जयदासः, मनोजोपाध्यायः 'सुमन' इत्युपनामकः, शम्भू झा, कवयित्री शैलजाझा, नीलमझा, नूतनकुमारी च स्वकीयाभिः रचनाभिः सर्वान् प्रभावितवन्तः।
रचनागोष्ठ्यां कविभिः कवयित्रीभिश्च देशभक्ति, सावनमासं तथा मानवीयसंवेदनाभिः परिपूर्णाः रचनाः प्रस्तुताः। तत्र भारतस्य पूर्वप्रधानमन्त्रिणः कवेश्च अटलबिहारीवाजपेयी-महोदयस्य पुण्यतिथौ काव्यमाध्यमेन तस्मै श्रद्धाञ्जलिरपि समर्पिता। रचनागोष्ठ्याः प्रारम्भः अरुणपाठकेन स्वस्य "हे माँ सरस्वति, बुद्धिविद्यादायिनी..." इति सरस्वती-वन्दनायाः मधुरया प्रस्तुत्या कृतः। ततः सुधामल्लिकेन शैलजाझया च भगवती-वन्दनायाः भावपूर्णा प्रस्तुति कृता।
अमनकुमारझा-महोदयेन "बाबा-पोता-संवादः", मनोजोपाध्यायेन 'सुमनेन' "दिवंगता माता" तथा "विरूपितं नगरम्", नीलमझया "जीवनं संग्रामः", "प्रिय प्राणनाथ, सादरं प्रणामः", धनञ्जयकुमारलालदासेन मैथिली-कविते "संगति" तथा "मानल हमरा किछु कष्ट रहैए", शैलजाझया मैथिली-कविते "सोचय पड़त" तथा "अकल्पितः अन्तः" प्रस्तुताः।
विजयशंकरमल्लिकेन मैथिली-कविते "सावनः मिथिलायाः मधुमासः...", "टिकल् छय बेटिए पर संसार...", हिन्दी-कविता "भारतस्य वीराः, युष्मभ्यं सलाम..." च इति प्रस्तुताः। बुद्धिनाथझावर्येण "वन्दे भारतम्" तथा "बाढ़िः आगता अस्ति", अरुणपाठकेन "राजनीतेः गौरवम् आसन् अटलः, संसदः परिचयः आसन् अटलः", डॉ. रामनारायणसिंहेन "सावनः" तथा "न मे मिलितः मनसः प्रियः" इत्यादयः रचनाः प्रस्तुताः। सर्वाभिः प्रस्तुतिभिः उपस्थितानां श्रोतृणां प्रशंसा प्राप्ता। पठितासु रचनासु समीक्षात्मकाः टिप्पण्यः अपि प्रदत्ताः। वरिष्ठसाहित्यकारः बुद्धिनाथझा अवदत् यत् एतादृशासु गोष्ठीषु उपस्थिताः भूत्वा यत् साहित्यिक- ऊर्जा प्राप्यते, तस्याः तुलना ऑनलाइन-कार्यक्रमैः कर्तुं न शक्यते। साहित्यं समाजाय सकारात्मकतायाः सन्देशं प्रददाति।
राजेन्द्रकुमारः अवदत् यत् साहित्यलोकस्य रचनागोष्ठी साहित्यकाराणां कृते कार्यशालेव अस्ति। अत्र आगत्य बहु श्रवणीयं शिक्षणीयं च प्राप्यते। अध्यक्षीयवक्तव्ये डॉ. रामनारायणसिंहः अवदत् यत् बोकारोनगरस्य साहित्यिक-वातावरणं ऊर्जस्वलं स्थापयितुं साहित्यलोकस्य प्रशंसनीयं योगदानम् अस्ति। भविष्येऽपि अस्याः संस्थायाः भूमिका एवं निरन्तरं भवतु इति सः शुभकामनाम् अयच्छत्।

# अनुकम्पानियुक्तौ न शक्यते भेद्भावः कर्तुम् : उच्चन्यायालयः



प्रदेश-उच्चन्यायालयेन डॉ. वाई.एस. परमार-उद्यानकृषि-वानिकी-विश्वविद्यालय-नौणी इत्यस्य पक्षतः प्रविष्टां विशेषानुमति-याचिकां (LPA) निरस्य स्पष्टीकृतं यत् अनुकम्पानियुक्तौ कस्यापि प्रकारस्य भेदः न अनुमन्यते। मुख्यन्यायमूर्ति-गुरमीतसिंह-सन्धवालिया-तथा-न्यायमूर्ति-बिपिनचन्द्रनेग्योः खण्डपीठेन दृष्टं यत् विश्वविद्यालयः एकतः निरन्तरम् अनुकम्पाधारेण नियुक्तयः यच्छति स्म, अपरतः च याचिकाकर्त्रे अधिक-कर्मचारिणः (Surplus Staff) इति व्याजं कृत्वा निषेधं कुर्वन् आसीत्। एतत् संविधानस्य अनुच्छेद-१४ (समानतायाः अधिकारः) इत्यस्य स्पष्टम् उल्लङ्घनम् अस्ति।
खण्डपीठेन उक्तं यत् अनुकम्पानियुक्तेः मुख्यम् उद्देश्यं पीडितपरिवाराय सद्यः साहाय्यप्रदानम् अस्ति। विश्वविद्यालयेन एषा नीतिः चयनात्मकरूपेण प्रयुज्य याचिकाकर्त्रा सह अन्यायः कृतः।

# हिमाचलः स्वास्थ्यविभागे पूरयिष्यन्ते

## औषधिनिर्माण-अधिकारिणः १८ पदानि, परामर्शनस्य (काउंसलिंग) तिथिः निश्चिता

शिमला। प्रदेशसर्वकारेण स्वास्थ्य-परिवारकल्याणविभागे औषधिनिर्माण-अधिकारिणः—एलोपैथी (फार्मेसी-ऑफिसर) इत्यस्य १८ पदानां नियोजनाय प्रमाणपत्राणां परीक्षणस्य परामर्शनस्य च समयसारिणी (Schedule) प्रदर्शिता। रोजगारविभागस्य माध्यमेन गणक्रमेण (Batch-wise) विधीयमानाय नियोजनाय योग्यप्रत्याशिनः आहूताः सन्ति। परामर्शनं ४, ५ सितम्बर दिनाङ्कयोः 'राज्य-स्वास्थ्य-एवं-परिवारकल्याण-प्रशिक्षण-केन्द्र' परिमहल-शिमलायां भविष्यति।
विभागस्य अनुसारेण १ तः ५७ अनुक्रमाङ्कपर्यन्तानाम् अभ्यर्थिनां परामर्शनं ४ सितम्बर दिनाङ्के प्रातः ९:३० वादने तथा च ५८ तः ११३ अनुक्रमाङ्कपर्यन्तानाम् अभ्यर्थिनां परामर्शनं ५ सितम्बर दिनाङ्के अस्मिन्नेव समये भविष्यति।

### अष्टादशसु (१८) पदेषु

सामान्यवर्गस्य: ७ पदानि
ईडब्ल्यूएस (EWS) वर्गस्य २ पदे
अनुसूचितजाति (SC) वर्गस्य ४ पदानि
अनुसूचितजाति-अन्त्योदय-बीपीएल वर्गस्य १ पदम्
अन्यपिच्छड़ावर्ग (OBC सामान्य) वर्गस्य २ पदे
अन्यपिच्छड़ावर्ग-अन्त्योदय-बीपीएलवर्गस्य १ पदम्
अनुसूचितजनजाति (ST) वर्गस्य १ पदम्
सम्मिलितम् अस्ति। अभ्यर्थिभिः परामर्शनकाले मूलशैक्षणिकप्रमाणपत्राणि, रोजगार-विनिमय-पत्रम् (Employment Exchange Card), हिमाचल-फार्मेसी-परिषदः वैद्यं पञ्जीकरणम्, वर्गप्रमाणपत्रम्, चरित्रप्रमाणपत्रं तथा च हिमाचलस्य मूलनिवासप्रमाणपत्रम् (Bonafide) इत्यादयः मुख्याभिलेखाः अवश्यम् आनेतव्याः।

# उच्चन्यायालयस्य आदेशः - हिमाचले

## सर्वकारीय-सीबीएसई-विद्यालयेषु शिक्षकाणां प्रधानाचार्याणां च शीघ्रं नियुक्तिं कुर्यात् सर्वकारः

हिमाचलप्रदेश-उच्चन्यायालयेन राज्यस्य सर्वकारीय-सीबीएसई (CBSE)-विद्यालयेषु शिक्षकाणां प्रधानाचार्याणां च नियुक्ति-पदस्थापनप्रक्रियां नियमानुसारेण शीघ्रं समापयितुम् आदेशः प्रदत्तः। नियुक्तयः न जाताः इति विषये न्यायालयेन सर्वकारात् विस्तृता वस्तुस्थिति-वृत्तान्तः (Status Report) अपि याचिता। अस्मिन् विद्यालयेषु शिक्षकाणां प्रधानाचार्याणां च कुल-स्वीकृतपदानां, सम्प्रति रिक्तपदानां सङ्ख्यायाः, उपलब्ध-योग्य-अभ्यर्थिनां येषां च नियुक्तिः अथवा पदस्थापनं लम्बितं वर्तते, तेषां समग्रं विवरणं दातव्यं भविष्यति।
न्यायमूर्ति-विवेकसिंहठाकुरस्य तथा च न्यायमूर्ति-रञ्जनशर्मणः खण्डपीठेन वीरेन्द्रसिंहस्य अन्येषां च याचिकाकर्तॄणां पक्षतः प्रविष्टायां याचिकायां श्रवणं कुर्वता अयम् अन्तरिम-आदेशः निर्गतः। याचिकाकर्तारः सेवायां रताः शिक्षकाः सन्ति, यैः सर्वकारीय-सीबीएसई-विद्यालयेषु समये नियुक्तिं पदस्थापनं च अभीप्सुभिः उच्चन्यायालयस्य शरणं स्वीकृतम्। तेषां कथनम् अस्ति यत् प्रक्रियां विलम्बेन विद्यालयानां शैक्षणिकी व्यवस्था बाधिता भवति। न्यायालयेन प्रथमदृष्ट्या मन्यते यत् अस्मिन् विषये अन्तरिम-आदेशदानस्य आधारः अस्ति। खण्डपीठेन राज्यसर्वकाराय सूचनापत्रं (Notice) प्रेषयित्वा दशदिनाभ्यन्तरे प्रतिवचनं (उत्तरम्) उपस्थापयितुम् आदेशः दत्तः।

# आपदाश्रयस्य १५०० कोटिरूप्यकाणां कृते प्रधानमन्त्रिणं प्रति पत्रम्, मुख्यमन्त्री अवदत्- आवश्यकता भवति चेत् पुनरपि स्मारकपत्रं प्रेषयिष्यते

हिमसंस्कृतवार्ताः- शिमला।

प्राकृतिकापदः आश्रयरूपेण प्रधानमन्त्री नरेन्द्रमोदिना घोषितस्य १५०० कोटिरूप्यकाणां संकुलस्य विषये मुख्यमन्त्रिणा प्रधानमन्त्रिणं प्रति पत्रं लिखितम् अस्ति। सः माध्यमप्रतिनिधिभिः सह वार्तालापे उक्तवान् यत् केन्द्रसर्वकाराय पत्रं प्रेषितम् अस्ति तथा आवश्यकता भवति चेत् पुनरपि स्मारकपत्रं प्रेषयिष्यते। अद्यावधि एषा आश्रय-राशिः राज्येन न प्राप्तम्। सः भाजपानेतॄन् लक्ष्यीकृत्य उक्तवान् यत् राज्यहितस्य विषयं स्थापयितुं भाजपाजनाः परवाणूतः अधः अपि गच्छेयुः। एतादृशी का वार्ता अस्ति यत् ते अधः गन्तुं भीयन्ते? भाजपायाः विधायकाः हिमाचलस्य अधिकाराणां कृते वार्तां न कुर्वन्ति। मुख्यमन्त्री उक्तवान् यत् वर्षे १९५२ तः हिमाचलाय आर. डी. जी. प्राप्ता भवति। अधुना सा निरुद्धा अस्ति। अस्य विषयस्य विषये अपि भाजपा राजनीतिं करोति।

सांसदानां रिपोर्ट-कार्डस्य विषये मुख्यमन्त्री उक्तवान् यत् भाजपानेतारः सामाजिकमाध्यमेषु सम्पूर्णं व्ययं कुर्वन्ति। सामाजिकमाध्यमेषु केवलम् एतदेव दर्शयितुं शेषितम् अस्ति यत् ते एव सर्वं कार्यं कुर्वन्ति, प्रदेशसर्वकारः तु किमपि न करोति। सामाजिकमाध्यमेषु सर्वकारस्य विरुद्धं सामग्रीं प्रसारितुं दीपकमले प्रायः ५० जनाः उपविशन्ति, ये तेषां विरुद्धं कञ्चित् न कञ्चित् अभिलेखं निष्कास्य सामाजिकमाध्यमेषु प्रसारयन्ति। मुख्यमन्त्री उक्तवान् यत् एडीआर-संस्थायाः पुरातनप्रतिवेदनस्य आधारेण अपि सामाजिकमाध्यमेषु आरोपाः क्रियन्ते। सः उक्तवान् यत् प्रायः २० वर्षपूर्वं यस्य सम्पत्तेः मूल्यं १४ लक्षरूप्यकाणि आसीत्, तस्याः मूल्यं अधुना २ कोटिरूप्यकाणि जातम्। सः आरोपितवान् यत् एतादृशस्य पुरातनप्रतिवेदनस्य आधारेण सामाजिकमाध्यमेषु विषयाः प्रदर्श्यन्ते।

मुख्यमन्त्री भाजपायाः स्वकीयभ्रष्टाचारं गोपयितुं सर्वकारस्य उपरि आरोपान् कर्तुम् आरोपितवान्। सः उक्तवान् यत् सर्वकारः शीघ्रमेव तथ्यानि सहितं श्वेतपत्रं (White Paper) आनयिष्यति। मुख्यमन्त्री एतदपि उक्तवान् यत् भाजपायाः आरोपपत्रसमित्यां तादृशाः जनाः सम्मिलिताः सन्ति, येषाम् उपरि भाजपा स्वयमेव वर्षे २०१७ तमे भ्रष्टाचारस्य आरोपान् अकरोत्। सः उक्तवान् यत् सर्वकारः श्वेतपत्रस्य माध्यमेन तथ्यानि सहितं सम्पूर्णां स्थितिं जनसमक्षं स्थापयिष्यति। भाजपायाः प्रदेशाध्यक्षस्य डॉ. राजीवबिन्दलस्य प्रश्नपत्र-प्रकटन-प्रकरणसम्बद्धेषु आरोपेषु मुख्यमन्त्री उक्तवान् यत् वर्तमानसर्वकारस्य कार्यकाले अनेकाः नियुक्तयः अभवन्। सर्वकारः अस्य सम्पूर्णं प्रतिवेदनं दास्यति यत् कति नियुक्तयः अभवन्। प्रतिदिनं युनः सेवायां सम्मिलन्ति। जेबीटी, व्याख्यातृ, सहायक-परिचारिका तथा सीबीएसई-शिक्षकाणां सहितं अनेकानां पदानां परिणामाः घोषिताः सन्ति।

**हिमाचले शीघ्रं भविष्यति मन्त्रिमण्डलस्य विस्तारः**

मन्त्रिमण्डल-विस्तारस्य विषये मुख्यमन्त्री उक्तवान् यत् अस्मिन् विषये प्रथमस्तरीया चर्चा पूर्वमेव अभवत्। अधुना द्वितीयस्तरीया वार्ता भविष्यति, तदनन्तरं मन्त्रिमण्डलस्य विस्तारः करिष्यते। आईएएस, आईपीएस तथा आईएफएस संवर्गस्य संख्यां न्यूनीकर्तुं गृहीते निर्णयस्य विषये मुख्यमन्त्रिणा पुनः प्रतिक्रिया प्रदत्ता। सः उक्तवान् यत् हिमाचलाय आवश्यकतायाः अपेक्षया अधिकानाम् अधिकारिणाम् आवश्यकता नास्ति।

# काष्ठमण्डपे ऐतिहासिकम् अभूतपूर्वञ्च छन्दोबद्ध- कवि- सम्मेलनम्





हिमसंस्कृतवार्ताः- वत्सदेशराजशर्मा।

संस्कृतनेपालीवाङ्मयजगतः कृते किञ्चन अद्वितीयं कीर्तिमानम् नेपालदेशस्य पुण्यहृदयस्थल्यां काष्ठमण्डपनगर्यां गौशालाक्षेत्रे स्थिते श्रीवेङ्कटेश-मन्दिरे वाग्देव्याः कश्चन ऐतिहासिकः अभूतपूर्वश्च सारस्वतमहोत्सवः अद्य सानन्दं सम्पन्नः। अयं गरिमामयः समारोहः भारतस्य राष्ट्रपतिभिः सर्वोच्चसम्मानेन विभूषितानां, साहित्यशास्त्रस्य मूर्धन्यविदुषां डॉ. उमेश नेपाल (पुरुषोत्तमनेपालः) महोदयानां पावनजन्मनक्षत्रस्य शुभोदये आयोजिता काचित् ऐतिहासिकी विद्वद्गोष्ठी आसीत्। अस्य वाग्यज्ञस्य सफलम् आयोजनं श्रीवेङ्कटेशगुरुकुले अध्ययनरतैः मेधाविभिः छात्रैः परमश्रद्धया सोत्साहं कृतम्, ये हि परमपूज्य- स्वामि- पुरुषोत्तमाचार्याणां, डॉ. उमेश- नेपाल (पुरुषोत्तमनेपालः) महोदयानां साक्षाच्छिष्याः सन्ति। अस्मिन् सम्मेलने न केवलं संस्कृतविद्वांसः, अपि तु नेपालीभाषायाः सुप्रसिद्धाः कवयोऽपि समुपस्थिताः आसन्। विशिष्टामन्त्रितकविरूपेण मञ्चे नेपालीभाषायाः आशुकविः डॉ. देवी नेपालः, संस्कृतसाहित्यस्य लब्धप्रतिष्ठाः कवयः डॉ. मुकुन्द लामिछाने, डॉ. जीवन अधिकारी, रामहरिः, माधवः, नेपालीभाषायाः कवयः अनुपः, तारानाथः, नवीनः, सुप्रसिद्धा नेपाली-कवयित्री लक्ष्मी-महोदया च समुपस्थाय स्वकीयां रसमयीं काव्यप्रस्तुतिं विहितवन्तः। मञ्चे संस्कृत-नेपाली-भाषयोः उभयोरपि छन्दोबद्धकाव्यानाम् अतीव मनोरमा रसवृष्टिः सञ्जाता, या हि नेपाल-भारत- सारस्वत- संस्कृत्योः कश्चन मणिकाञ्चनसंयोगः इव प्रतीयते स्म।

अस्याः ऐतिहासिक्याः गोष्ठ्याः सर्वोत्कृष्टं विस्मयजनकञ्च वैशिष्ट्यम् आसीत्- 'अस्याः आद्योपान्तं छन्दोबद्धत्वम्'। यत्र अद्यत्वे मञ्चेषु सामान्य-संस्कृत-भाषणमपि विरलं प्रतीयते, तत्र सम्पूर्णकार्यक्रमस्य मञ्चसञ्चालनम्, अतिथिस्वागतं, मन्तव्यप्रकटनं, धन्यवादज्ञापनञ्च यावत् सर्वमेव कार्यं कविना ओमप्रकाश अवस्थिना अत्यन्तं कुशलतया महर्षिपिङ्गलप्रणीतेषु कठोरनियमेषु बद्धैः श्लोकैरेव सम्पन्नम्। अस्य अद्भुत- सञ्चालन- कौशलस्य विषये नेपालीभाषायाः मूर्धन्यः आशुकविः डॉ. देवी-नेपालमहोदयः अपि विस्मयमुग्धः सञ्जातः। तेन स्वकीये सामाजिकसञ्जाले साभिमानं लिखितं यत्- "सञ्चालकेन ओमप्रकाश अवस्थिना संस्कृत-कवयः संस्कृतेन, नेपालीकवयः च नेपालीभाषया एव भावपूर्णपद्यैः मञ्चे आमन्त्रिताः। एतदपेक्षया अपि सर्वाधिकम् आश्चर्यजनकम् इदम् आसीत् यत्- येन छन्दसा कविना स्वकाव्यं प्रस्तुतं, सञ्चालकेन तत्क्षणमेव तेनैव छन्दसा समीक्षात्मकं धन्यवाद-ज्ञापनमपि कृतम्!" अद्यतन-युवाकवेः ईदृशम् अकल्पनीयं तात्कालिक-छन्दो-विधानं दृष्ट्वा डॉ. देवी-नेपालमहोदयेन "शिष्यादिच्छेत् पराजयम्" इति सूक्तिम् उद्धृत्य अस्य वाग्यज्ञस्य भूरि-भूरि प्रशंसा कृता।एतदतिरिच्य, अस्य कार्यक्रमस्य परमं वैशिष्ट्यम् आसीत् यत् अन्ते साक्षात् आचार्यैः उमेशनेपालमहोदयैः यद् अनुग्रहभाषणम् (आशीर्वचनम्) प्रदत्तम्, तदपि पूर्णतः पद्यमयमेव (छन्दोबद्धमेव) आसीत्। स्रग्धरा- शार्दूलविक्रीडित-मन्दाक्रान्तादीनां महाछन्दसाम् ओजस्विना धाराप्रवाहेण सम्पूर्णं सभामण्डपं गुञ्जायमानं जातम्। सम्पूर्णेऽपि कार्यक्रमे गद्यस्य लेशमात्रमपि प्रयोगः न जातः।साहित्यजगतः कृते, न केवलं नेपालभूमौ अपि तु सम्पूर्णे विश्वे, ईदृशः आद्योपान्तं छन्दोबद्धः कार्यक्रमः सर्वथा अद्वितीयः, अभिनवः, कीर्तिमानरूपश्च वर्तते। सञ्चालकस्य कवीनाञ्च धाराप्रवाहं छन्दोबद्धं सम्भाषणं श्रुत्वा उपस्थिताः साहित्यानुरागिणः मन्त्रमुग्धाः सञ्जाताः। गुरु- शिष्य-परम्परायाः ज्वलन्तमुदाहरणरूपः अयं छन्दोमयो वाग्विलासः संस्कृतपत्रकारितायाः साहित्याकाशस्य च इतिहासपृष्ठेषु सुवर्णाक्षरैः अङ्कितो भविष्यति इति

# अधिकारिणां स्थानान्तरणाय सर्वकारेण न्यूनतम-कार्यकालः निर्धारणीयः - उच्च-न्यायालयः

हिमसंस्कृतवार्ता — शिमला।

प्रदेश-उच्च-न्यायालयेन सर्वकारीय-अधिकारिणां पुनः-पुनः क्रियमाणेषु स्थानान्तरणेषु एकः बृहत्-निर्णयः श्रावितः। न्यायालयेन स्पष्टीकृतं यत् कोऽपि अधिकारी 'प्रथम-श्रेण्याः' (Class-1) अस्ति इत्यस्य अयम् अर्थः नास्ति यत् विभागः तस्य निरन्तरम् अकारणं च स्थानान्तरणं कुर्यात्। उच्च-न्यायालयेन राज्य-सर्वकाराय परामर्शः दत्तः यत् सः प्रथम-श्रेण्याः अधिकारिणां कृते अपि एकं न्यूनतमं कार्यकालं निर्धारयेत्, येन तेषां स्थानान्तरणेषु निष्पक्षता सुरक्षिता भवेत्। न्यायाधीशेन अजयमोहनगोयल-महोदयेन बबनेशचड्ढा-नाम्ना जनैः प्रवेशितायाः 'सिविल रिट'-याचिकायाः श्रवणं कुर्वता अयम् महत्त्वपूर्णः आदेशः कृतः, याचिकाकर्तुः स्थानान्तरण-आदेशश्च निरस्तीकृतः।

याचिकाकर्त्ता बबनेशचड्ढा मण्डी-मण्डलस्य 'बालीचौकी'-विकास-खण्डे कार्यरतः आसीत्। विभागेन १ जुलै २०२६ दिनाङ्के एकम् आदेशं प्रसार्य तस्य स्थानान्तरणं ततः कृतम् आसीत्। अस्मिन् आदेशे सति तेन न्यायालयस्य शरणं गृहीतम्। न्यायालयस्य ज्ञाने एषा वार्ता समायाता यत् याचिकाकर्तुः बालीचौकी-स्थाने सेवां ददत मात्रम् एकं वर्षम् एकादश (११) मासाः एव व्यतीताः आसन्। अस्मात् पूर्वम् अपि सः ०१.०७.२०२० तः १६.०९.२०२१ पर्यन्तं करसोग-मण्डी-क्षेत्रे, ततः ०६.०९.२०२१ तः ०६.०४.२०२३ पर्यन्तम् आनी-कुल्लू-क्षेत्रे निरन्तरं न्यून-समये स्थानान्तरणस्य कष्टं सोढवान् आसीत्। न्यायालयेन अङ्गीकृतं यत् अधिकारिणे तस्य वर्त्तमान-नियुक्ति-स्थाने एकं सम्मानजनकम् उचितं च कार्यकालं यापयितुम् अनुमतिं विना स्थानान्तरणस्य कोऽपि तार्किकः आधारः नास्ति।

# कृषि-अनुसन्धानं क्षेत्रं यावत् प्रापय्य कृषकाणाम् आयवर्धनम् अस्माकं प्राथमिकता



- **कृषकाणां, महिलानां, यूनां तथा श्रमिकाणां विकासस्य मुख्यधारायां संयोजनाय २० आगस्त-दिनाङ्कात् प्रारप्स्यते जनकल्याण-संवाद-अभियानम्~ श्रीविजयकुमारसिंहः**

हिमसंस्कृतवार्ता राघवनाथझाः नवदेहली। भारतीयकृषि-अनुसन्धानपरिषदः (ICAR) सप्तनवतितमे (९७) वार्षिक-साधारण-अधिवेशने नवदेहल्यां बिहारस्य माननीयाः कृषिमन्त्रिणः श्रीविजयकुमारसिंहाः केन्द्रीयकृषि-तथा-कृषककल्याणमन्त्रिणा श्रीशिवराजसिंहचौहानेन, केन्द्रीयराज्यमन्त्रिभिः तथा विभिन्नानां राज्यानां माननीयैः कृषिमन्त्रिभिः सह सम्मिलिताः अभवन्। मेलने कृषि-अनुसन्धानम्, आधुनिकप्रविधिः, प्राकृतिककृषिः, बीजोत्पादनम्, कृषकाणाम् आयवर्धनं तथा कृषिक्षेत्रे यूनां सहभागिता इत्यादयः बिहारसम्बद्धाः महत्त्वपूर्णाः विषयाः विचारिताः।

मेलने बिहारस्य कृषिपरीस्थितेः कृषकाणां चावश्यकतानां रेखाङ्कनं कुर्वन्तः कृषिमन्त्रिणः अवदन् यत् बिहारं कृषिप्रधानं राज्यम् अस्ति। राज्यस्य समृद्धकृषिक्षमताम् आधुनिकप्रविधेः, वैज्ञानिक-अनुसन्धानस्य, प्रसंस्करणस्य तथा कृषिनिर्यातस्य माध्यमेन संयोज्य कृषकेभ्यः वृत्तिवर्धनस्य आयस्य च नवीनावसराः सृज्यन्ते।

बिहारे अल्पवृष्टेः स्थितौ अपि त्रिनवत्यधिक-प्रतिशततः (९३%) अधिकं धानरोपणकार्यं सम्पन्नम्, निर्धारितलक्ष्यप्राप्तये च द्रुतगत्या अग्रेसरम् अस्ति। कृषिमन्त्रिभिः विशेषरूपेण मखाना-उत्पादस्य उन्नतानां जातीनां विकासार्थं, वैज्ञानिकोत्पादन-प्रविधेः, यन्त्रीकरणस्य, मूल्यवर्धनस्य निर्यातक्षमतायाश्च वर्धनार्थं ICAR-स्तरे विशेषानुसन्धानस्य आवश्यकता प्रतिपादिता। ते अवदन् यत् बिहारस्य विशिष्टकृष्युत्पादानां वैश्विकविपणिना सह संयोजनाय अनुसन्धानसंस्थानां, केन्द्रसर्वकारस्य तथा राज्यसर्वकारस्य च समन्वितप्रयासाः अनिवार्याः सन्ति।

ते बिहारे प्लावनस्य (जलप्लवस्य) तथा अनावृष्टेः सदृशीनां प्राकृतिकानाम् आपदानां सम्मुखीकरणाय जलवायु-अनुकूल-तथा-अल्पावधि-सस्यजातीनां विकासे अपि विशेषबलं प्राददुः। अनेन सह 'डिजिटल'-कृषिप्रविधिं लघु-तथा-सीमान्त-कृषकेभ्यः प्रापयितुं, यूनां महिलाकृषकाणां चाधुनिककृषिप्रविधिभिः संयोजनाय आवश्यकता दर्शिता। कृषिमन्त्रिभिः कथितं यत् बीजोत्पादनाय तथा प्राकृतिकखादोपयोगस्य संवर्धनाय विशेषानुदानस्य व्यवस्था आवश्यकी अस्ति। रसायनमुक्तसस्य-शाक-फल-द्विदलोत्पादनाय तथा तैलबीजोत्पादनायअनुदानम्, प्रशिक्षणम्, विपणिः तथा कृषकेभ्यः उचितमूल्यं प्रदातुं केन्द्र-राज्ययोः संयुक्तप्रयासाः अपेक्षिताः सन्ति।

ते अवदन् यत् केन्द्रसर्वकारस्य साहाय्यं विना राज्येषु प्राविधिकविकासस्य अनुकूलवातावरणनिर्माणं दुष्करम् अस्ति। कृषिक्षेत्रे शिक्षितानां यूनां कृषिसम्बद्ध-उद्यमिता-योजनासु प्राथम्यदानाय केन्द्रीयस्तरे अपि आवश्यकाः प्रयासाः करणीयाः। तैः सूचितं यत् बिहारसर्वकारेण कृषि-शिक्षितान् यूनाः कृषिक्षेत्रे योजयितुं प्राथमिकताधारेण कार्यं क्रियते। लघु-तथा-सीमान्तकृषकान् संघटितान् सशक्तांश्च विधातुं सहकारिसमितीनां माध्यमेन कृषकप्रोत्साहनस्य आवश्यकतायां बलमददुः। अनेन क्षुद्रकृषकाः शासकीययोजनानां समुचितलाभप्राप्तौ, सामूहिकरूपेण कृष्युपकरणानां ग्रहणे, उत्पादनविपणनयोः दृढीकरणे च सहायं प्राप्स्यन्ति। माननीयैः कृषिमन्त्रिभिः ग्रामीणविकासविभागस्य योजनानां लाभम् अपि कृषकेभ्यः प्रभावीरीत्या प्रापयितुम् आवश्यकता दर्शिता, येन ग्रामीणक्षेत्रेषु कृष्याधारितजीविकायाः आधारभूतसंरचनायाश्च दृढीकरणं भवेत्। तैः सूचितं यत् बिहारे 'कृषक-कृषि, महिला-उद्यम, युवा-रोजगार तथा श्रमिक-उत्थान सह जनकल्याण-संवाद-अभियानस्य' आरम्भः क्रियते। अस्य अभियानस्य शुभारम्भः २० आगस्त-दिनाङ्के बामेती-स्थले माननीयैः केन्द्रीयकृषिमन्त्रिभिः श्रीशिवराजसिंहचौहान-महोदयैः विधास्यते। अनेन अभियानेन कृषकाणां, महिलानां, यूनां तथा श्रमिकाणां कल्याणार्थं तथा कृषिक्षेत्रे वृत्तिकायाः उद्यमितायाश्च नवीनावसरेषु संवादः अग्रे नेष्यते।

ते अवदन् यत् प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वे देशः कृषिक्षेत्रे अनुसन्धानस्य, नवाचारस्य तथा प्राविधिकविकासस्य दिशि द्रुतगत्या अग्रे सरति। 'जय जवान, जय किसान, जय विज्ञान, जय अनुसन्धानम्' इति संकल्पेन सह कृष्यनुसन्धानस्य परिणामान् क्षेत्रं यावत् प्रापय्य एव कृषकाणाम् उत्पादकतायाः, आयस्य जीवनस्तरस्य च स्थायिसुधारः सम्भवः अस्ति।माननीयैः मन्त्रिभिः कथितं यत् बिहारसर्वकारस्य लक्ष्यम् अस्ति यत् वैज्ञानिक-अनुसन्धानस्य आधुनिकप्रविधेः च लाभः अन्तिमायां पङ्क्तौ स्थिताय कृषकाय प्राप्येत तथा च कृषिः केवलम् उत्पादनात् अग्रे नीत्वा प्रसंस्करणेन, मूल्यवर्धनेन, कृषिक्षेत्रीय-उद्यमितया तथा निर्यातेन सह योजनीया। अनेन विकसितभारतेन सह विकसितस्य, आत्मनिर्भरस्य समृद्धस्य च बिहारस्य निर्माणाय गतिः प्राप्स्यते।

# ललितनारायणमिथिलाविश्वविद्यालयेन 'स्वयं'-माध्यमेन प्रथमवारं चत्वारः पाठ्यक्रमाः प्रवर्तिताः

हिमसंस्कृतवार्ता दरभंगा राघवनाथझाः।

ललितनारायणमिथिलाविश्वविद्यालयेन राष्ट्रियशिक्षा-नीतेः अनुपालने प्रथमवारं स्वकीयाः स्नातकोत्तर-पाठ्यक्रमाः भारतसर्वकारस्य राष्ट्रिय-अन्तर्जाल-शिक्षणमञ्चेन 'स्वयं' इत्यनेन सह संयोजिताः। जुलाई–दिसम्बर २०२६ सत्रस्य षाण्मासिक्याः कृते चतुर्षु विभागेषु चत्वारः पाठ्यक्रमाः स्वीकृताः।


अस्य समायोजनस्य शुभारम्भावसरे कुलपतिः आचार्यः सञ्जयकुमारचौधरी अवदत् यत् — राष्ट्रियशिक्षानीतेः स्नातकोत्तरपाठ्यक्रमस्य नूतनरूपरेखायाश्चानुरूपं विश्वविद्यालयेन 'स्वयं'-मञ्चमाध्यमेन चत्वारः पाठ्यक्रमाः समाविष्टाः। अनेन प्रयासेन छात्रेभ्यः देशस्य प्रख्यातशिक्षकाणां मार्गदर्शनम्, उच्चगुणवत्तायुक्ता अध्ययनसामग्री, स्वेच्छया गत्यनुसारेण अध्ययनस्य सौविध्यं तथा च विद्या-ऋण-कोशस्य द्वारा अङ्कानां स्थानान्तरणस्य लाभः प्राप्स्यते। एतेन स्नातकोत्तरशिक्षायाः गुणवत्ता सुदृढा भविष्यति। आन्तरिकगुणवत्ता-आश्वासनप्रकोष्ठस्य निदेशकः डॉ. मो. ज़िया हैदरः अकथयत् यत् — एतत् संयोजनं निरन्तरशैक्षणिकगुणवत्तासंवर्धने विश्वविद्यालयस्य दृढसंकल्पं संस्थागतप्रक्रियाणां राष्ट्रियमानकैः सह सामञ्जस्यं च प्रदर्शयति।

विश्वविद्यालयस्य 'स्वयं'-सम्पर्काधिकारी डॉ. मुदस्सिरहसनभटः न्यवेदयत् यत् — अनुमोदितपाठ्यक्रमेषु पञ्जीकरणार्थं विश्वविद्यालयस्य नियन्त्रणपट्टिका सम्प्रति सक्रिया वर्तते, आगामिसत्रेषु अन्येऽपि पाठ्यक्रमाः योजयिष्यन्ते।

स्वीकृतानां चतुर्णां पाठ्यक्रमाणां विवरणम् (सत्रम्: जुलाई–दिसम्बर २०२६):

**रसायनशास्त्रम्-:** यन्त्रसाधन-प्रगतयः तथा रासायनिकदत्तांश-विश्लेषणम् । परामर्शकः: डॉ. मोनी शर्मा । राष्ट्रिय-समन्वयकः: सी.ई.सी.

**भौतिकशास्त्रम्-:** भारतीयज्ञानपरम्पराः अभियान्त्रिकी-क्षेत्रे अवधारणाः अनुप्रयोगाश्च । परामर्शकः: डॉ. दीपक कुमारः । राष्ट्रिय-समन्वयकः: आई.आई.एम.बी.



**भूगोलशास्त्रम्-:** आपद्-जोखिम-न्यूनीकरणं प्रबन्धनं च । परामर्शकः: डॉ. रश्मिशिखा । राष्ट्रिय-समन्वयकः: आई.एन.आई.

वाणिज्यम्-: उद्यमिता । परामर्शकः: डॉ. निर्मला कुशवाहा । राष्ट्रिय-समन्वयकः: आई.एन.आई.

एते सर्वे पाठ्यक्रमाः स्नातकोत्तरस्तरे उपलभ्यन्ते। पञ्जीकरणस्य अन्तिमतिथिः ३१ आगस्त २०२६ अस्ति। इच्छुकाः छात्राः आधिकारिकजालपुटे swayam.gov.in गत्वा पञ्जीकरणं कर्तुं शक्नुवन्ति।

# प्रत्येक-क्षेत्रीयभाषायै स्थापयिष्यते 'उत्कृष्टता-केन्द्रम्' (Centre of Excellence); परिणाम-आधारितं भविष्यति शिक्षक-प्रशिक्षणम्



- **भोजपुरी-मगही-मैथिली-अङ्गिका-प्रभृतीनां मातृभाषाणां संरक्षणाय संवर्धनाय च सर्वकारस्य महती योजना**
- **शिक्षक-प्रशिक्षणे नूतना क्रान्तिः, व्याख्यातृभ्यः लप्स्यते प्रख्यातेभ्यः प्रबन्धन-संस्थानेभ्यः (IIM) प्रशिक्षणम्**

हिमसंस्कृतवार्ता पाटलिपुत्रम् राघवनाथझा। बिहारसर्वकारेण राज्यस्य क्षेत्रीयभाषाणां संरक्षणाय, संवर्धनाय, अनुसन्धानाय च संस्थागतं रूपं प्रदातुं महत्त्वपूर्णः ऐतिहासिकश्च निर्णयः गृहीतः। भोजपुरी, मगही, मैथिली, अङ्गिका इत्यादिसर्वासां प्रादेशिकभाषाणां कृते पृथक्-पृथक् उत्कृष्टता-केन्द्राणि (Center of Excellence) स्थापयिष्यन्ते। एतेषु केन्द्रेषु स्थानीयभाषाणाम् अध्ययने, उच्चस्तरीय-शोधकार्ये, संरक्षणे च विशेषं ध्यानं दास्यते। एषा सूचना शिक्षामन्त्रिणा मिथिलेशतिवारिणा भौमवासरे महेन्द्रू-स्थिते राज्य-शिक्षा-शोध-तथा-प्रशिक्षण-परिषदि (SCERT) आयोजिते समीक्षा-उपवेशने प्रदत्ता। उपवेशने शिक्षायाः गुणवत्ता, शिक्षक-प्रशिक्षणम्, मूल्याङ्कनम्, अङ्कीय-शिक्षा (डिजिटल-शिक्षा), संस्थागत-क्षमता-विकासः तथा छात्राणां सर्वाङ्गीण-विकास-सम्बद्धानां विषयाणां विस्तृता समीक्षा संजाता।

शिक्षामन्त्रिणा प्रतिपादितं यत् शिक्षक-प्रशिक्षणं केवलम् औपचारिकतामात्रं न स्थास्यति, अपि तु तत् पूर्णतया परिणाम-आधारितं विधास्यते। सः राज्य-शिक्षा-शोध-परिषदः प्राध्यापकेभ्यः लक्ष्यं निर्धार्य कार्य-दक्षतां (Smart Working) स्वीकर्तुं प्रशिक्षणस्य प्रभावस्य च मूल्याङ्कनं कर्तुं निर्दिष्टवान्। अनेन सह प्राध्यापकानां नेतृत्व-क्षमता-विकासार्थं तेभ्यः भारतीय-प्रबन्धन-संस्थान (IIM) सदृशेभ्यः प्रतिष्ठित-संस्थानेभ्यः प्रशिक्षणं प्रदास्यते।

राज्यस्य प्रायः षड्लक्ष-शिक्षकाणां क्षमता-निर्माणस्य उत्तरदायित्वं परिषदि वर्तते। मन्त्रिणा कथितं यत् संस्थायाः भूमिका केवलं प्रशिक्षण-आयोजने न समाप्यते, अपि तु गुणवत्तापूर्ण-शिक्षायां छात्राणां समग्र-विकासे च अस्याः महती भूमिका भविष्यति।

अङ्कीय-शिक्षायाः (डिजिटल-शिक्षायाः) संवर्धनाय परिषद्-कक्षतः शीघ्रमपि 'बिहार-विद्यावाणी' इति ध्वनिसम्प्रसारणस्य (Podcast) शुभारम्भः भविष्यति। अस्य माध्यमेन शिक्षकेभ्यः छात्रेभ्यश्च शैक्षणिक-सामग्री, नवाचाराः, प्रशिक्षण-सम्बद्धाः महत्त्वपूर्णाः सूचनाश्च प्राप्स्यन्ते।

विद्यालयेषु सामाजिक-सहभागितां वर्धयितुम् 'अस्माकं विद्यालयः, अस्माकं स्वाभिमानम्' इति जालपुटमपि (Portal) शीघ्रमपि उन्मोचयिष्यते। अनेन पूर्वतन-छात्राः स्व-पुरातन-विद्यालयेन सह संयोज्य विद्यालयानाम् अङ्गीकरणाय (गोद लेना) विकासकार्येषु साहाय्यार्थं च प्रेरिताः भविष्यन्ति।

उपवेशने शिक्षाविभागेन सह सन्धि-पत्रे हस्ताक्षरं कृतवतीभिः सप्तभिः स्वयंसेवी-संस्थाभिः सह प्रत्यक्ष-विचार-विमर्शस्य (Live Discussion) आयोजनस्य निर्णयः कृतः, येन तासां संस्थानाम् अनुभावानां लाभः शिक्षक-प्रशिक्षण-व्यवस्थायां प्राप्येत।

शिक्षामन्त्रिणा ज्ञापितं यत् परिषदः सर्वेषाम् एकादशानां (११) विभागानां समीक्षा कृता, प्रत्येकाय विभागाय च निर्धारित-लक्ष्यानुरूपं कार्यं सम्पादयितुं निर्देशाः प्रदत्ताः। एतासां योजनानाम् उपलब्धीनां च अग्रिमा विस्तृता समीक्षा दिसम्बर-मासे भविष्यति।

सर्वकारस्य अनेन प्रयासेन पञ्च मुख्याः प्राथमिकताः स्पष्टीभवन्ति — क्षेत्रीयभाषाणां संरक्षणम्, परिणाम-आधारितं शिक्षक-प्रशिक्षणम्, प्राध्यापकानां क्षमता-विकासः, अङ्कीय-शिक्षायाः विस्तारः तथा च विद्यालयानां विकासे समाजस्य पूर्वतन-छात्राणां च सक्रिया सहभागिता।

# मगध-मिथिला-तिरहूत-क्षेत्रेषु विकासस्य महाशङ्खनादः-: शोण-फल्गु-सङ्गमः, नव-प्रकल्पानां च द्रुतप्रगतिः




- **गया-एकीकृत-निर्माण-संकुलस्य (IMC) कृते मार्ग-जलापूर्ति-व्यवस्था २०२७ वर्षात् प्रागेव पूर्णा भविष्यति; शोणनद्याः फल्गुं प्रति प्रवहति जलधारा – मुख्यमन्त्री**
- **राष्ट्रियौद्योगिक-वीथिका-विकास-न्यासस्य (NICDIT) मेलने बिहारस्य उद्योग-पर्यटन-परियोजनानां महती समीक्षा; मिथिलायां तिरहूते च मासैकेनैव सिद्धाः भविष्यन्ति प्रमुखाः प्रकल्पाः**

हिमसंस्कृतवार्ता दरभंगा राघवनाथझाः। मुख्यमन्त्री सम्राट् चौधरी अद्य अन्तर्जाल-दृश्यसंवाद-माध्यमेन (Video Conferencing) नवदेहल्याः अशोका-विश्रामगृहे आयोजिते राष्ट्रियौद्योगिक-वीथिका-विकास-तथा-कार्यान्वयन-न्यासस्य (NICDIT) सर्वोच्च-निरीक्षण-प्राधिकरणस्य तृतीये उपवेशने सम्मिलितः अभवत्। एतस्य महत्त्वपूर्णस्य उपवेशनस्य अध्यक्षता भारतसर्वकारस्य वित्तमन्त्रिणा निर्मला-सीतारामन्-महोदयेन कृता।

उपवेशने मगध-मिथिला-तिरहूतादि-समग्रबिहारराज्ये प्रचलितानां प्रस्तावितानां च विविधानाम् औद्योगिक-, आधारभूत-संरचना- तथा पर्यटन-परियोजनानां प्रगतेः विस्तृता गभीरा च समीक्षा समभवत्। विशेषरूपेण मगधक्षेत्रे गयायां विकस्यमानस्य 'एकीकृत-निर्माण-संकुल'-प्रकल्पस्य (IMC) प्रगतेः विषये विस्तरेण विचार-विमर्शः जातः। मुख्यमन्त्रिणा न्यवेद्यत यत् गया-एकीकृत-निर्माण-संकुल-प्रकल्पाय भूमिसम्बद्धा वृत्तिः (आख्या) सप्ताहाभ्यन्तरे एव केन्द्रसर्वकाराय समर्पयिष्यते। सः दृढतया अकथयत् यत् प्रकल्पक्षेत्रे मार्ग-जलापूर्ति-सम्बद्धानि सर्वाणि आवश्यकाङ्गानि २०२७ ख्रिष्टाब्दात् पूर्वमेव समापयितुं निश्चितं लक्ष्यं वर्तते, येन औद्योगिक-क्रियाकलापेभ्यः अपेक्षिताः आधारभूत-सुविधाः कालमर्यादायां प्राप्येरन्।

मगधस्य जलसमस्यायाः निवारणाय शोणनद्याः पावनं जलं फल्गुनद्या सह संयोजयितुं कार्यं द्रुतगत्या अग्रेसरति। अस्यान्तर्गते प्रायः नव-किलोमीटर-दीर्घा जलनलिका (पाइपलाइन) तथा द्विविंशति-किलोमीटर-दीर्घा कुल्या (नहर) खनिष्यते, यया उभे नद्यौ परस्परं संयोजिते भविष्यतः। अस्य बृहत्प्रकल्पस्य सम्पूर्तेः अनन्तरं गया-परिसरे जलाभावस्य समस्या समूलं नङ्क्ष्यति। मगधक्षेत्रेण सहैव मिथिला-तिरहुत-क्षेत्रयोः विकासं रेखाङ्कयन् मुख्यमन्त्रिणा 'भव्या-योजना'-अन्तर्गते दरभङ्गायां मुजफ्फरपुरे च प्रस्तावितानां प्रकल्पानाम् अपि विवरणं प्रदत्तम्। सः स्पष्टमकरोत् यत् एताभिः परियोजनाभिः सम्बद्धानि कार्याणि मासैकेनैव पूर्णतां नेतुं तीव्रगत्या प्रशासनिकप्रयासाः क्रियन्ते। सः प्रतिपादितवान् यत् राज्यसर्वकारः बिहारराज्ये औद्योगिक-विकासेन सहैव धार्मिक-बौद्ध-पर्यटनयोरपि व्यापकं कायाकल्पं करोति। अतः विष्णुपद-मन्दिरस्य तथा बोधगया-वीथिकायाः (कॉरिडोर) निर्माणकार्याणि अपि शीघ्रातिशीघ्रं सम्पादयिष्यन्ते। मुख्यमन्त्री प्रत्यपादयत् यत् सः स्वयं सततं सर्वान् प्रकल्पान् समीक्षते, निर्धारित-कालमर्यादायां कार्यसम्पूर्त्यै सम्बद्ध-विभागेभ्यः स्पष्टाः निर्देशाः दत्ताः सन्ति।



# संस्कृत कथा मञ्जरी"

।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
"अथ विक्रमादित्यमहाप्रयाणम्"


ततोऽनन्तरं वर्षेषु बहुषु गतेषु प्रतिष्ठाननगरे शालिवाहनः सार्धवर्षद्वयकन्यायां शेषनागेन्द्रादुत्पन्नः। उज्जयिन्यां भूकम्प- धूमकेतु- दिग्दाहधृत्पाताः राज्ञा जनैश्च दृष्टाः| ततो विक्रमादित्यो दैवज्ञान् आहूय अवादीत्- "भो दैवज्ञाः! किमेतदुत्पाताः? राज्ञा जनैश्च प्रतिदिनं दृष्टाः भवन्ति? एतेषां फलं किम्? कस्य अनिष्टं कथयन्ति?"
तैरुक्तं- "देव! अयं भूकम्पः सन्ध्याकाले जातः, अतः राज्ञोऽनिष्टं सूचयति।
इति दैवज्ञवचनं श्रुत्वा राजा तं पुनरब्रवीत्--"भो दैवज्ञाः! मया तपसा सन्तोषितः ईश्वरः प्राह- 'भो राजन्! प्रसन्नोऽस्मि, पर्यायिण अमरत्वं याचस्व' तदा मया भणितं- भो देव! सार्धवर्षद्वयकन्यायां पुत्रो यदि भविष्यति, तस्मात् मम मरणमस्तु नान्येन। ईश्वरेण तथाऽस्तु भणितम्। तर्हि तादृशं कुतो जनयिष्यति? दैवज्ञेरुक्तं- देव! दैवो सृष्टिरचिन्त्या, तादृशः कस्मिनपि देशे उत्पन्नो भविष्यति, द्रक्ष्यासि। ततो राजा वेतालमाह्वयैतत् सर्वं तस्मै निवेद्याब्रवोत्- "भो यक्ष! त्वं सर्वत्र पृथ्वीमध्ये परिभ्रमन्नेवंविधः कस्मिन् देशे कस्मिन् नगरे समुत्पन्न इति निश्चित्य स्थानं ज्ञात्वा, झटिति समागच्छ"। ततो वेतालः महाप्रसाद इति वीथिकां गृहीत्वा, कुशद्वापाद्वीपानालोक्यं जम्बूद्वीपं प्रत्यागत्य, प्रतिष्ठाननगरं प्रविश्य कुम्भकारगेहे कश्चिन्माणवकं काश्चन कन्यकाञ्च क्रोडमान दृष्ट्वा अपृच्छत्- अहो! युवां परस्परं किं प्रभवतम्? तदा कन्ययोक्तम्- "अयं मम पुत्रः"। वेतालेनोक्तं, "तव पिता कः?" तदा कोऽपि ब्राह्मणो दर्शितः। ततो वेतालः ब्राह्मणमपृच्छत्- केयम्? इति। ब्राह्मणेनोक्तम्- "इयं मम कन्या, अस्याः पुत्रोऽयम्"। तच्छ्रुत्वा विस्मयं गतो वेतालः पुनर्ब्राह्मणमब्रवीत्- भो ब्राह्मण! कथमेतत्? ब्राह्मणेनोक्तं- "देवानां चरितमगोचरम् अस्यां शेषनागेन्द्रः सङ्गममकरोत् तस्मादस्यां जातः पुत्रोऽयं शालिवाहनः इति।
तच्छ्रुत्वा वेतालः सत्वरम् उज्जयिनीम् आगत्य राज्ञे विक्रमादित्याय सर्वमपि वृत्तान्तमकथयत्। राजा तस्मै पारितोषिकं दत्वा खड्गमादाय प्रतिष्ठाननगरं गतः यावत् खड्गेन शालिवाहनं हन्तुं प्रवृत्तः तावत तेन दण्डेन ताडितः प्रतिष्ठाननगराद्उज्जयिन्यां पतितः वेदनामसहमानः शरीरं विससर्ज।
{इति विक्रमादित्यमहाप्रयाणम्}
अथ तस्य राज्ञः सर्वाः स्त्रियोऽग्निप्रवेशं कर्तुं प्रवृत्ताः मन्त्रिणस्तु स्वयं राज्यं पालयितुं प्रवृत्ताः। तदिन्द्रदत्तं सिंहासनं तथैव शून्यमासीत्।
एकदा सभामध्ये अशरीरिणी वाक् आसीत्- भो मन्त्रिणः! यः स्वयं राज्यं पालयितुमेतस्मिन् सिंहासने उपवेष्टुञ्च योग्यः तादृशो राजा नास्ति; तर्हि सुक्षेत्रे निक्षिप्यतामिदं सिंहासनम्। तच्छ्रुत्वा सर्वैमन्त्रिभिरतिपवित्रक्षेत्रे तत् सिंहासनं निक्षिप्तम्। निक्षेपानन्तरं बहूनि वर्षशतानि गतानि।

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीररजः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। नवदेहली-नगरे एकेन नवप्रशिक्षार्थिना न्यायालयस्य कार्यं निराकृतम्। तेन उक्तं यत् तस्मिन् समये व्यायामशाला गन्तव्या इति।
**नन्दिनी-** अहो विचित्रम्! युवकानां प्राथमिकताः नूतनाः सन्ति। अन्यदेकं शृणु, एकया महिलया कृत्रिममेधा- तन्त्रांशः एव स्वस्याः अपत्यम् इति उद्घोषितम्।
**काव्या-** हा हा! तस्याः बुद्धिः नष्टा अस्ति!
एतत् पश्य, जापानदेशस्य विमानस्थानके शुल्क-अधिकारिभिः द्वाविंशति-पादकोशेषु द्विशतं सरटाः प्राप्ताः। एकः यात्री तान् पादकोशेषु स्थापितवान् अस्ति।
**नन्दिनी-** हे भगवन्! पादकोशेषु सरटाः! तान् दृष्ट्वा अधिकारिणः भीताः स्युः। अन्तिमा वार्ता- हरियाणाराज्यस्य एकस्मिन् भोजनालये यन्त्रमानवः स्थापितः। तेन यन्त्रमानवेन जनेभ्यः घृतरोटिकाः परिवेषिताः।
**काव्या-** अद्भुतम्! यन्त्रेण कार्यं शीघ्रं कृतम्। अस्माकं जगत् अतीव विचित्रं जातम्।




# "एआई-सहायकात् एआइ-कार्यप्रतिनिधिः पर्यन्तम् एआई-प्रौद्योगिकी प्रगतिः प्राप्ता।"

हिमसंस्कृतवार्ताः- रविः खरिडेहालः, बेङ्गलूरु।
एकः AI सहायकः अस्ति। सरलप्रश्नउत्तरयन्त्ररूपेण स्थापितम् अस्ति।
क्लाउड एआई-कार्यप्रतिनिधिः अधिकजटिलकार्यं कुर्वन्ति। अस्मिन् बहुविध एआइ-कार्यप्रतिनिधिः समन्वयं भवति। एआई सरलप्रश्नोत्तरेभ्यः कार्यप्रवाहम् अनुमातुं च यावत् यात्रां कृतवान् अस्ति। गार्टनर "व्यापार-प्रौद्योगिकी-अन्तर्दृष्टिः" इति परामर्शदातृसंस्था अस्ति।
गार्टनर कथितेन इति - एतावता एआई-सेवाव्ययः प्रश्न-प्रेरित-चिह्नैः अभवत् इतः परं च अनुमानैः भविष्यति। अनुमानव्ययः २०२८ तमे वर्षे ५ गुणान् वर्धयितुं शक्यते। ३ मौलिकप्रवृत्तयः अस्याः व्ययसंरचनायाः चालनं कुर्वन्ति।
१) आधारभूतप्रतिमानानां व्यय-अर्थशास्त्रे तीव्रगत्या प्रवृद्धिः भवति।
२) उन्नतदक्षता शक्तिशालिनः अधिकमहत्त्वपूर्णानां च प्रतिमानानां कृते उद्घाटिता अस्ति।
३) परिष्कृतकार्यप्रवाहाः सरलप्रतिमानानाम् अपेक्षया अधिकानि प्रश्न-प्रेरित-चिह्न-प्रतीकाः उपयुज्यन्ते। एवं एआई उत्पादनेतृणां कृते अनुमानव्यय-प्रबन्धनं सर्वोच्चप्राथमिकता अस्ति।

# भागलपुरप्रमण्डलस्य अङ्गप्रदेशे बिहुलाविषहरीमहोत्सवस्य भव्यतया आयोजनम्



**भागलपुरम्, बिहार,१८ अगस्त २०२६।**
अङ्गप्रदेशस्य लोकसंस्कृतेः दृढश्रद्धायाश्च प्रतीकभूतः बिहुलाविषहरीमहोत्सवः बिहारराज्यस्य भागलपुरनगरे भव्यतया पारम्परिकोल्लासेन च आरब्धः जातः। सोमवासरे प्रातःकालादारभ्य जनपदस्य सर्वेषु पूजामण्डपेषु देवालयेषु च माता मनसाविषहरीमातुः दर्शनार्थं डलियासमर्पणार्थं च श्रद्धालूनां महासम्मर्दः दृष्टः। सायंकाले वैदिकपारम्परिकविधिना भगतपूजन अभवत्, ततः परं रात्रौ वाद्यघोषैः सह बाललखेन्द्रस्य वरयात्रा अगच्छत् तथा लोकगाथानुसारं सतीबिहुलया सह विवाहस्य समस्ताः विधयः सम्पन्नाः अभवन्। अस्मिन् वर्षे भागलपुरजनपदे १८२, नगरे च ११६ स्थानेषु विषहरीमातुः प्रतिमाः प्रतिष्ठापिताः सन्ति।चम्पानगरस्थिते मनसाविषहरीस्थाने, परबत्ती, ईशाकचक, भीखनपुर, खञ्जरपुर, बरारीकालोनी, गोशाला, दीपनगर, जोगसरादिषु प्रमुखस्थानेषु मातुः पूजामण्डपानि सुशोभितानि सन्ति। विषहरीपूजास्थलेषु भगतलीलायाः आयोजनम् अभवत्। भगताः पारम्परिकवेषभूषां धारयन्तः नृत्यन्तः मनौनगीतानि गायन्तः गङ्गास्नानं कृत्वा पूजां सम्पादयन्ति स्म। महाशयड्योढ़ीस्थिते ऐतिहासिके लोहाबासगृहे विजयप्रकाश-झा इत्यस्य नेतृत्वे पूजनं सम्पन्नम् अभवत्, यस्मिन् देवाशीषबनर्जी, काकुलीबनर्जी तथा अन्ये गणमान्यजनाः उपस्थिताः आसन्। मोहद्दीनगरकागजीटोलातः रात्रौ सार्धाष्टवादने चान्दोसौदागरपुत्रस्य बाललखेन्द्रस्य वरयात्रा निरगच्छत्, या मोहद्दीनगरदुर्गास्थानमार्गेण पुनः पूजास्थलं प्राप्स्यति। परबत्तीक्षेत्रे रात्रौ एकादशवादने सतीबिहुलालखेन्द्रयोः विवाहः सम्पन्नः अभवत्। ईशाकचकबुढ़ियाविषहरीस्थानात् रात्रौ अष्टवादने, मिरजानहाटमार्गात् च नववादने वाद्यवृन्दैः सह वरयात्राः निरगच्छन्।चम्पानगरे बडीखञ्जरपुरक्षेत्रे च लोकगाथाधारिताः सजीवदृश्याणि श्रद्धालूनां विशेषाकर्षणस्य केन्द्रानि आसन्। नागकलशान् धारयन्त्यः महिलाः "विषहरी-मातुः जयः" इति जयघोषान् कुर्वन्त्यः भक्तिरसे निमग्नाः दृश्यन्ते।
अस्मिन्नवसरे केन्द्रीयपूजासमितेः अध्यक्षः भोलाकुमारमण्डलः, कार्यकारी अध्यक्षः प्रदीपकुमारः, महासचिवः शशि शङ्कर रायः तथा अन्ये पदाधिकारिणः विविधेषु पूजास्थलेषु गत्वा व्यवस्थायाः निरीक्षणम् अकुर्वन्।
आदमपुरस्थिते रानीचन्द्रावतीपरिसरे प्रतिष्ठापितायाः स्थायिप्रतिमायाः अपि विधिविधानपूर्वकं पूजनम् अभवत्। निर्धारितकार्यक्रमानुसारं मुख्यप्रतिमानां तु पारम्परिकरीत्या बुधवासरे भव्यविसर्जनसमारोहस्य आयोजनं भविष्यति।

**वार्ता प्रेषकः-डा विमलेश झा, भागलपुर, बिहार**